श्रीगणेशायनमः॥श्रीगणेशंनमस्कृत्यकेशवीनामपद्धतेः॥गणितंविघ्ननाथेनक्रियते बालबुद्धये॥१॥नत्वाविघ्नपशारदाच्युतशिवब्रह्मार्कमुख्यग्रहान्कुर्वेजातकपद्धतिंस्फुटतरांहोराविदांप्रीतये॥यत्रेःस्पष्टतरोजन्मसमयोवेधोत्रखेटाःस्फुटायत्पक्षेहिघटंतउद्गमइहास्तर्क्षंसषड्भः सच॥२॥व्याख्या॥अहंकेशवःजातकपद्धतिंकुर्वे॥जातस्येदंजातकं॥जातस्यबालकस्यजन्मांतरार्जितसदसत्कर्मजनितशुभाशुभफलनिरूपकंशास्त्रंजातकमित्युच्यते॥जातकशास्त्रेयानिकर्माणिगणितक्रियास्तेषांपद्धतिंमार्गंकुर्वे॥किंकृत्वा॥नत्वा॥कान्॥विघ्नपशारदाच्युतशिवब्रह्मार्कमुख्यग्रहान्॥विघ्नपोगणेशः॥शारदासरस्वती॥अच्युतोविष्णुः॥शिवोमहादेवः॥ब्रह्मचतुराननः॥अर्कमुख्यग्रहाःसूर्यादयोनवग्रहाः॥एतान्नत्वा॥जातकपद्धतिंकुर्वे॥कथंभूतांपद्धतिंस्फुटतरांप्रकटार्थाः॥कस्यैसिद्धयेज्योतिर्विदांप्रीतये॥ज्योतींषिग्रहनक्षत्रादीनिविंदंतितेज्योति १

र्विदः॥तेषांप्रीतये॥अत्रजन्मसमयोस्पष्टतरःसूक्ष्मोज्ञातव्यः॥कैःयत्रैः॥यथासुगणकैर्नवेद्यः॥श्रीमत्केशवदैवज्ञैर्विद्यमानघटनामवलोक्यसाधितस्तेगणेशदैवज्ञैःग्रहलाघवेनिबद्धाःसौरोर्कपीतियहलाघवे॥इहजन्मसमयेउद्गमःउग्रंसाध्यास्वोदयैःसउद्गमःषड्राशियुक्तोलग्नंभवतिसप्तमभावोभवति॥अथउदाहरणक्रमोलिख्यते॥संवत्१६४२शालिवाहनशके१५०८आषाढशुद्धे७सोमेघटी२२पळें६उत्तराफल्गुनीघटी४१पळे१२व्यतीपातयोगघटी११।पळें२५अत्रसूर्योदयात्गतघटी षु५१पळें२८तथारात्रिगतघटीषु१८पळेषु४०जन्मदिनमानं३२।४८।रात्रिमानं३०पळें१२अयनांशाः१७।४५अक्षभा४चरखंडानि४०।३२।१३।चरंकृणं८४देशांतरयोजनानिधनानि४०अथमध्यमग्रहसाधनार्थमहर्गणोलिख्यते।तत्रकल्पात्।सृष्टेः।कलिताद्वागताद्यगणस्यादिनगणस्यचज्ञानार्थंसुगमोपायेनसूच्छ्यो

के० तिर्विदांश्लोकत्रयंकरशरयुगसप्ताभ्राभ्रषट्खद्वितुरग ७२०६३६००७४५२सहि
२ तश्चेद्ब्रह्मतुल्यद्युपिंडः। इहभवतिकल्पादावहर्गणः। खाद्रिभूमीनगयुग नवपक्षाब्धिकभू।
१९७२९४७१७९युक्शाकोब्दाः। शररसगुणभूषण्णागरामाभ्रवेदांबुधिशशिनग७
१४४०३८६१३६५युक्तो ब्रह्मतुल्यद्युपिंडः। सइहभवतिसृष्टेश्चाथगोत्सृष्टिरामाष्ट
भुजगजशरबाणांकेंदु १९५५८८३१७९युक्तः शाकोब्दाः॥२॥नागरामनगवेदष
ट्शरक्ष्मा १५६४७३८युतोदिनगणः कृतहते॥स्यादयंकलिमुखोथगोद्रिभूरा
कलितैः म ३१७९संयुतशकोत्रवत्सराः॥३॥५॥ब्रह्मतुल्यद्युपिंडः १४७२०५ करशरयुग
सप्ताद्रिभिरेतैरंकैः ७२०६३६००७४५२युक्तोजातःकल्पाद्यहर्गणः॥७२०६
३६१५४७५७॥ ॥तथाखंकाद्रीभूम्यादिभिरंकै१९७२९४७१७९युक्तः शा २
कु १५०८जातःकल्पादितोगताब्दाः१९७२९४८६८७ एवंशररसगुणादिभिरंकैः

७१४४०३८६१३६५युतोहर्गणः १४७२०५जातःसृष्ट्यहर्गणः७१४४०५००
८६७० तथागोत्सृष्टिरामादिभिः१९५५८८३१७९युक्तः शकः १५०८जाताःसृष्टि
गताब्दाः१९५५८८४६८७ एवंनागरामनगादिभिः १५६४७३८युक्तोहर्गणः
१४७२०५जातःकलिमुखोहर्गणः १७१२०४२तथागोद्रिरामैः ३१७९युक्तः शकैः
१५०८जातःकलिगताब्दाः ४६८७॥ ६॥अथउदयांतरदेशांतरस्वरूणभुजफलसं
स्कृतास्तात्कालिकामध्यमाश्चरव्यादयोग्रहाः सगतिलिख्यंते॥

मध्यमाःसगतिकाः स्पष्टाःसूर्योदयः

सू	चं	चंद्रो	मं	बुधः	गु	शुक्रः	शनिः	राहुः	केतुः	सू	चं	मं	बुधः	गु	शुक्रः	शनिः	राहुः	केतुः
२	५	११	०	६	२	०	०	६	०	२	२	२	२	३	५	३	६	०
२१	१२	११	२१	३	२	३५	१९	५	५	१२	१२	२१	३३	३८	२५	१३	५	५
२२	२५	२२	३०	२०	३	२२	२३	३०	३०	२१	२५	३५	३१	३५	१३	३८	३०	३०
२४	३८	५३	३८	३७	३४		३०	४०		५८	३८	४५	३९	३२	५४	५२	५०	५०
५८	७७	६	३१	२६	५	०	२	३	३	५६	८७	४१	४४	१३	७७	४	३	३
८	३५	५१	२६	२४	०	०	०	२१	२१	५६	३८	३८	५५	३४	४६	४०	२१	२१

१४
२१
३६

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

लंकोदयाः			स्वदेशोदयाः		
मे	२७८	भी	मे	२३८	भी
वृ	२९९	कुं	वृ	२६७	कुं
मि	३२३	म	मि	३२०	म
कृ	३२३	ध	कृ	३३६	ध
मि	२९९	वृ	मि	३३१	वृ
कृ	२७८	तू	कृ	३२८	तू

अथस्वोदयैर्लग्नंसाध्यते॥ तत्साधनंब्रह्मतुल्ये। तात्कालिकोर्कायनभागयुक्तस्तद्भोग्यभागैरूद्धोहतःस्वः॥ खाग्न्युद्धृतस्तंरविभोग्यकालंविशोधयेद्दिष्टघटीपलेभ्यः॥१॥ तदंशतोराश्युदयश्च शेषमशुद्धंहृत्खाग्निगुणंलवाद्यं॥ अशुद्धपूर्वैर्भवनैरजाद्यैर्युक्तंतनुःस्यादयनांशहीनं॥२॥ भोग्यात्स्वकालेखगुणाहतेर्कःस्वीयोदयाप्तांशयुतोविलग्नं॥ अथलग्नादिष्टसाधनं॥ अर्कस्यभोग्यस्तनुभुक्तयुक्तोमध्योदयाढ्यःसमयोविलग्नात्॥३॥ यदैकोलग्नरवीतरात्तज्ञागांतरद्योदयखाग्निभक्तः॥ स्यादिष्टकालेयदिलग्नमूनंशोध्योद्यरात्रा६०थवारजन्या॥४॥ रात्रीष्टकालेतुसषड्भसूर्यालग्नंततोप्युक्तवदिष्टकालः॥ अत्रोदाहरणं॥ तात्कालिकोर्कः २।१४।२०।५८ रात्रौ

जन्मइतिकारणात्सषड्भः॥८।१४।२०।५८ अयनांशागै१७।५१ र्युक्तः ९।२।५।५८ अस्यभोग्याभागा २७।५५।२ मकरस्योदयेन २१० गुणिताःखाग्न्युद्धृताश्चजातोभोग्यकालःपलाद्यावयवः २८८।२८।४०।इष्टकालस्य १८।४० पलेभ्यः १९२० भोग्यकालेषाढे २८८।२८।४० शेष ८३१।३१।२० कुंभोदयादारभ्यमेषपर्यंतंशुद्धाः।अशुद्धोवृषभः१शेषं ८८।३१।२० खाग्निगुणितं २६५५५ ४०।०।अशुद्धोदयेनवृषभेण २६७ भक्तंलब्धंलवाद्यंफलं ९।५६।४६।मेषादशुद्धपूर्वैः९सहितं१।९।५६।४६।इदंअयनांशहीनंजातंलग्नं०।२२।१९।४६।इदंराशिषट्कयुक्तंसप्तमंलग्नं६।२२।१९।४६।अथदशमलग्नसाधनमाह॥ तत्राद्योनतोन्नतसाधनं॥ रात्रेरिति॥ नतंचतुर्द्धादिवापूर्वपश्चिमंच।रात्रौपूर्वपश्चिमंच।अर्धरात्रादुपरिरात्रेरिति।रात्रेःशेषमितंयुतंदिनदलेनान्होगतंशेषकं

विश्लेष्यं खलु पूर्वपश्चिमनतं त्रिंश २० च्युतं चोन्नतं ॥ यत्पूर्वोन्नतषड्घ्युक्तरवितः
पश्चान्नतादित्यतो यल्लंकोदयैश्चलग्नमिवतत्साध्यं सषड्घ्युक्तरवं ॥ २ ॥ नतं चतुर्द्धा
दिवा पूर्वपश्चिमं च । रात्रौ पूर्वपश्चिमं च । अर्द्धरात्रादुपरि रात्रिशेषं । दिनदलेन युतं
कार्यं । तत्रात्रौ पूर्वनतं स्यात् । अर्धरात्रात्प्राक् रात्रिगतं दिनदलेन युतं कार्यं रात्रौ
पश्चिमनतं स्यात् । दिनार्द्धात्प्राक् भग्नहः गतं दिनदलेन विश्लेषं दिनार्द्धाद्बोधितं
दिवसे पश्चिमनतं स्यात् । तन्नतं त्रिंशच्युतं । २० । उन्नतं स्यात् । तद्यथा । पूर्वनतं त्रिं
शत्च्युतं पूर्वोन्नतं स्यात् । पश्चिमनतं त्रिंशत्च्युतं पश्चिमोन्नतं स्यात् । दृग्भावसा
धने पूर्वोन्नतेसति उन्नतमिष्टकालं प्रकल्प्य । सषड्गताल्कालिकार्कसायनात्सूर्यं
प्रकल्प्य । लंकोदयैरुन्नवल्लग्नं साध्यं तन्साध्यं दृग्लग्नं स्यात् । सषड्भं राशिष ४
ड्युक्तं सुरवं ४ चतुर्थभावो भवति । पश्चिमनतेनतं इष्टकालं प्रकल्प्य तात्कालि

कसूर्यादुन्नवल्लग्नं लंकोदयैः साध्यं । तदेवदृग्लग्नं राशिषड्युक्तं चतुर्थभावो भवति ।
अस्योदाहरणं ॥ रात्रिगतघटी १८ । ४० । रात्रिमानं २७ । १२ । रात्रेः शेषं ८ । ३२ । दिनद
लेन १६ । २४ युतं २४ । ५६ । पूर्वनतं त्रिंशच्युतं पूर्वोन्नतं ५४ । उन्नतमिष्टकालं प्र
कल्प्य ५४ । ५ सषड्भस्यायनः सूर्यः ८ । १५ । २०५८ । तात्कालिकार्कः सायन इत्यादि
नाभोग्यकालः पलाद्यः २० । ३४ । ३१ । उन्नवल्लग्नं लंकोदयैः ९ । १२ । ३६ । ३७ ।
इदमेवदृग्लग्नं सषड्भं चतुर्थलग्नं ३ । १२ । ३६ । ३७ । एवं भावचतुष्टयं सिध्य
ति । तदंतराष्टभावसाधनं । त्र्यंशा इति ॥ त्र्यंशाव्यस्तरवभ १० स्यभू १ पम २ हतोयो
ज्यस्तनोद्वि २ च्युतोबंधो ४ तोपिवसांग ६ भास्तनुमुखाः संधिर्द्वियोगोर्धिनः ॥ शू
न्यंसंधिषु भावगे विलग्फलं स्याद्भावसंधंतरे णाप्तं संधिरवगो नरक्षयचये भावोधि
केत्येवगे ॥ ३ ॥ व्यस्तरवभस्य त्र्यंशः विगतोस्तं समनलग्नं यस्मात्तत्व्यस्तं । व्यस्त

चतत्खांशं च। खंनामदशमलग्नं। व्यस्तखभस्यत्र्यंशः। तृतीयांशोराश्यादिः। सप्तमरहितदशमस्यत्र्यंशोराश्यादिर्ग्राह्य इत्यर्थः। उदाहरणं। सप्तमलग्ने ६।२२।१२ ४६। दशमलग्नात् ९।१२।३६।३७। शोधितेशेषं २।२०।२३।५१। शेषस्यत्र्यंशः ०।२६।४७।५७। भूयमहतोयोऽयः। एकोगुणः ०।२६।४७।५७। लग्ने०।२२।१२।४६। योजितःजातोद्वितीयभावः१।१९।०।४३।अन्यत्रद्विगुणो१।२३।३५।५४। लग्नेयोजितःजातस्तृतीयभावः२।१५।४८।४०। एवंद्वितीयतृतीयभावौस्तः। सत्र्यंशोद्विच्युतो०।२६।४७।५४। द्वाभ्यांशोधितो१।३।१२।३। भूयमहतोबंधो४ योऽयः। एकगुणः१।३।१२।३। चतुर्थभावेयोजितः३।१२।३६।३७। सन्पंचमः। ४।१५।४८।४०। अन्यद्विगुणः २।६।२४।१९। चतुर्थभावेयोजितः। ५।१९।०।४३। एवंपंचमषष्ठौ

भावौस्तः। एतेसांगाभावाः राशिषड्युतातनुमुखाद्दशभावाः भवंति। संधिरिति। द्वयोर्भावयोर्योगार्धसंधिःस्यात्। तद्यथा। लग्नगाद्वितीययोर्योर्धंलग्नस्यविरामसंधिः। धनभावस्यआरंभसंधिः। तनुभावः०।२२।१२।४६। धनभावः।१।१९।०।४३। अनयोर्योगार्धसंधिः।१।५।२६।४९। जातोलग्नधनयोःसंधिः। लग्नस्यविरामसंधिः। धनभावस्यारंभसंधिः। अत्रभावद्वययोगकरणेचक्राधिक्यतायांचक्रंनत्याज्यं। तद्यथा। यथाप्रथमभावे एकादशभवनानिस्युः॥ अग्रिमभावेपूर्णंस्यात्तदापूर्णभावोद्वादशग्राह्यः॥ यदाप्रथमभावेशून्यभवनानिस्युः अग्रिमभावे एकोराशिः तदाप्रथमभावेशून्यंग्राह्यं। एवंबुद्धिमताज्ञेयं अथलग्नचतुर्थेसिद्धेयथासर्वेभावाः ससंधयोयुगपदेवसिध्यंति॥ तथाप्रकारोलिख्यते॥ लग्नंचतुर्थात्सशोध्यशेषषष्ठंतनौक्षिपेत्। सलग्नधनयोःसंधिःस

धोषष्ठंपुनःक्षिपेत्॥१॥सभवेद्ऊनभावोत्रतंषडंशंपुनःक्षिपेत्॥सभवेदग्रिमः
संधिरेवंभाक्चतुष्टयं॥२॥रूपात्संशोध्यषष्ठांशं निक्षिपेतंचतुर्थके॥ऊर्ध्वक्रमे
णषड्भावायदाजाताःससंधयः॥३॥तदातेराशिषट्काढ्याःसप्तमाद्याभवंतिते॥
एवंयुगपदेवात्रभावाःसर्वेससंधयः॥४॥एवंजाताःसर्वेससंधयोभावएकत्रलि

त	धन	स	सु	सु	रि	जा	मृ	ध	क	आ	व्य
सं	सं	सं	सं	सं	सं	सं	सं	सं	सं	सं	सं

भावबलानि

सू	चं	मं	बु	गु	शु	श
च	च	क्ष	च	च	क्ष	च

आदेरग्रहोहस्यानि

ख्यंते॥शून्यसंधिषुशैते॥संधितु
ल्येग्रहेशून्यंफलं॥भावसमेग्रहेस

६

पूर्णरूपंबलंस्यात्॥अंतरेअनुपातः।संधिखगांतरंभावसंध्यंतरेणेष्टंसत।ग्रह
स्यभावफलंस्यात्।भावान्यूनेग्रहेसतितस्यभावस्यआरंभसंधिनासहअंतरंकृ
र्यं।भावाद्ग्रहेधिकेसतिविरामसंधिनासहअंतरंकार्यं।फलंक्षयंचयंज्ञेयं।तद्यथा।
भावाधिकेग्रहेक्षयफलं।भावान्यूनेग्रहेचयफलं।उक्तंचदामोदरपद्धतौ।भावोन्मु
खगः पूर्वसंधिनारहितस्तदा।अधिकश्चेद्विरामाख्यसंधेःशोध्यस्तदंतरं॥१॥भाव
संध्यंतरेणेष्टंतद्भावफलमुच्यते।तदारोहंपूर्वसंधेरवरोहंतथांतिमादिति।अथा
रोहावरोहाफलानांमुदाहरणं॥रविः २।१४।२०।५।रविनिकटसंधिः २।२।२४।१।
रविनिकटभावः २।१५।४८।४०।भावसंध्यंतरं ०।१३।२३।४२।संधिखगांतरं।
०।११।५६।१७।सवर्णितौभाज्यभाजकौ।भाज्यः ४२९७३।भाजकः ३८२३९।
भाजकेनभक्तेभाज्येलब्धंरवेर्भवफलं।०।४३।२७।चयसंज्ञंभावाद्ग्रहस्यन्यून

क्र. १

जन्मलग्नकुंडली

भावकुंडली

१	२	३	४	५	६	७	८	९	१०	११	१२
०	१	१	२	०	४	३	२	१	०	०	७
	श	म	गु			मं	शु	रा			
	४	४	४			४	४	४			

त्वात्। एवं चंद्रादीनामपि ज्ञेयं। अथ भावकुंडलीनिर्णयः। ग्रहे भावादधिके सति विरामसंधेः सकाशात् अधिके सति तदाग्रिमभावपूर्वं दद्यात्। ग्रहे भावान्न्यूने सति आरंभसंधेः सकाशात् ऊने सति तदापूर्वभावपूर्वं दद्यात्। ग्रहे भावादधिके सति विरामसंधेः सकाशाद्ऊने सति यथास्थितेएव। ग्रहे भावाद्ऊने सति आरंभसंधेः

भावदृष्टिचक्रं

	त	ध	स	ष	सु	रि	जा	म	ध	कु	आ	व्य
र	:	:	:	:	:	:	:	:	:	:	:	:
च	:	:	:	:	:	:	:	:	:	:	:	:
म	:	:	:	:	:	:	:	:	:	:	:	:
बु	:	:	:	:	:	:	:	:	:	:	:	:
गु	:	:	:	:	:	:	:	:	:	:	:	:
शु	:	:	:	:	:	:	:	:	:	:	:	:
श	:	:	:	:	:	:	:	:	:	:	:	:

ग्रहदृष्टिचक्रं

दृश्या:	र	च	म	बु	गु	शु	श
दृष्टासूर्यः	:	:	:	:	:	:	:
दृष्टचंद्रः	:	:	:	:	:	:	:
दृष्टभौमः	:	:	:	:	:	:	:
दृष्टबु.	:	:	:	:	:	:	:
दृष्टगुरु	:	:	:	:	:	:	:
दृष्टशु.	:	:	:	:	:	:	:
दृष्टाश	:	:	:	:	:	:	:

सकाशात्अधिकेसतियथास्थितएव।अयतात्कालिकमित्रामित्रचक्रेकेंद्रादि
किंचारेतनुगेखलेदशमकर्मेखंतर्दशमकर्मेलग्नकुंडलीसकाशाद्विचारः।नतुभा
वकुंडलीसकाशात्भावकुंडलीभावपदार्थमिव।नतुबलसाधने॥५॥ ॥इतिश्री
दिवाकरात्मजविश्वनाथदैवज्ञेनकेशवीपद्धतौसाधनाध्यायः॥ ॥५॥
अथदृश्यानयनमाह॥खेवाग्निद्विखवेदरामयमभूखाभ्रमेकादिभेदृष्टव
र्जितदृश्यकस्यगुरुणाचेदष्ट८वेद४हृताः४॥मंदेनांक९यमे२१सज्ञानग७
गुणे२१क्षभाद्विजाःसंस्कृताभागघ्नक्षयवृद्धिखानल२०लवेनाब्धि४कृताद्रंभ
वेत्॥४॥दृष्टावर्जितदृश्यकस्यएकादिभेएकमारभ्यद्वादशपर्यंतंभेरक्षौशै
वेसतिभाद्विजाःरक्षाद्विजाःखेकादयोंकाःयथाक्रमंस्युः।तद्यथा।एकभेख०
द्विभेएकाकामात्यादि।पश्यतीतिदृष्टादृश्यकोदर्शनार्होदृश्यः।दृश्यएवदृश्यकः



चेन्गुरुणादृष्टावर्जितदृश्यकस्यअष्टभे८चतुर्भे४।वेदाःचत्वारोंकःस्यात्।।
नपूर्वःमंदेनदृष्टावर्जितदृश्यकस्यनवभे९द्विभे२चत्वारोंकःस्यान्नपूर्वकः।भौ
मेनदृष्टावर्जितदृश्यकस्यसप्तभे७त्रिभे३चत्वारोंकःस्यान्नपूर्वः।अस्योदाहरणं।
दृष्टशनिः०।१३।३८।५२।दृश्योरविः२।१४।२०।५८।अयंदृष्टाहीनोजातः२।
०।४२।६।मंदेनांकयमेहृताइत्यनुक्तत्वात्भादिजांकाश्चत्वारः४।अग्रेगमाः३।
अनयोरंतरंतरंक्षयः१भागेः०।४२।६।गुणितः।०।४२।६।अस्यखानलवेन
०।१।२४।क्षयस्यविद्यमानत्वात्।अनेनभादिजांकः४।रहितः२।५८।३६।च
तुर्भुक्तःसूर्योपरिशनिदृष्टिः०।५९।३९।भौमगुरुशनीनामन्योविशेषोस्ति।अस्यो
दाहरणं।दृष्टगुरुः२।८।३५।९दृश्यश्चंद्रः५।१२।२५।३२।अयंदृष्टाहीनोजा
तः३।२।५०।२३।तृतीयराश्यधोंकः२।चतुर्थराश्यधोंकः।२।अग्रिमांक२

अयंनग्राह्यः।द्विस्थानेचत्वारोग्राह्याइत्यभिप्रायः।एवंभौमशन्योरविरयं
नग्राह्यः।तत्रचत्वारएवग्राह्याः।अनयोरंतरंस्वरधनं१भागाद्येनगुणितः।।
२।५०।२३त्रिंशद्भिर्भक्तंलब्धं०।७।४०।अनेनभादिजांकः३युक्तः३।७।४०।च
तुर्भुक्तःचंद्रोपरिगुरुदृष्टिः।०।४६।५५।एवंचंद्रादीनामपियहदृष्टिवत्भाव
दृष्टिसाधनं।ग्रहदृष्टिचक्रं।इतिदृष्टिसाधनाध्यायोदाहरणं।अथग्रहाणांच
लाबलज्ञानविनोसर्वत्रजातकोक्तफलनिर्णयोदशाक्रमबलनिर्णयश्चकृ

र	च	म	बु	गु	शु	श		र	च	म	बु	गु	शु	श
०	१	९	५	३	११	६		६	७	३	११	९	७	०
१०	३	२८	१५	५	३	२०		१०	३	२८	१५	५	२७	२०
०	०	०	०	०	०	०		०	०	०	०	०	०	०

उच्चानि नीचानि

र्तनशक्यते।।
अतोबलसाध
नाध्यायआर
भ्यते।।तत्रबळं

स्थान १ दिक् २ काल ३ निसर्ग ४ चेष्टा ५ दृष्टिभिः ६ षड्विधं । तत्र स्थानबलं पंचधा । उच्चबलं १ सप्तवर्गजबलं २ विषमसमराशिनवांशबलं ३ केंद्रादिगतबलं ४ पुरुषनपुंसकस्त्रीग्रहाणामादिमध्यांतद्रेक्काणगतबलं ५ । एवं पंचधा । तत्रादावुच्चबलमाह ॥ नीचोनोभगणा १२ च्युताषड्धिकश्वेत षड्हृदोच्चबलं स्वर्क्षे धंसमभेष्मस्त्रिचरणमूलत्रिकोणेबलं ॥ मित्रर्क्षेधिरधीष्टभेत्रयरभागावेरि भेर्ध्वंशकोदंतांशोध्यारिभैगृहाधिपवशात्खेटस्यसप्तैकजा ॥ ५ ॥ ग्रहः नीचोनः कार्यः । षडधिकश्वेत्भगणात् १२ च्युतः द्वादशराशिभ्यः शोध्यः चेत्षड्दलयः तदायथास्थितएवेत्यर्थतः सिद्धं । सप्तस्यादिकः । षड्हृतश्चबलं स्यात् । अत्र भजनप्रकारः । यदानीचोनग्रहस्यसंपूर्णाः षड्राशयस्तदाषड्भक्ताः रूपबलं स्यात् । यदाषड्भोत्यस्तदारूपस्थानेशून्यं । ग्राह्यं । तद्राशयः षष्ठ्याप्त

ण्याः । अधोभागाद्यं द्विगुणंकृत्वासंयोज्यपुनः षड्भक्तं कार्यं तदुच्चबलं स्यात् । तत्र ग्रहाणामुच्चनीचानिवृहज्जातकेऽजवृषभमृगांगनाकुलीरसमवणिजोवदि वाक्रादितुंगाः ॥ दश १० शिखि २ मनु १४ युक् तिथी १५ द्रियां ५ शैक्ष्मिनवक २७ विंशतिभिरंशकैस्तनीचाः । अस्योदाहरणं । रविः २ । १४ । २० । ५८ । रविनीचं ६ । ७ । ० । नीचोनरविः ८ । ५ । २० । ५८ । अयंषड्भाधिकोस्ति । अतोभगणाच्युतः ३ । २५ । ३९ । २ । षड्भक्तलब्धं रूपस्थानेशून्यं । शेषं ३ । २५ । ३९ । २ । षष्ठिगुणितं । द्विगुणेन ५ भं धस्थांकेनयुतं २३ । ३९ । २ । षड्भक्तलब्धं द्वितीयंपलं २ । शेषं २ । ३९ । २ । षष्ठिगुणितं १२० । द्विगुणेन ७८ । अधस्थांकेनयुतं । १९८ । २ । षड्भक्तलब्धं तृतीयंपलं ३३ । शेषं २ । षष्ठिगुणितं १२० । द्विगुणेन० । अधस्थांकेनयुतं ४ । षड्भक्तलब्धं चतुर्थंपलं ० । एवं चंद्रादीनामपि ॥ एवंजातानिउच्चउच्चबलानिलिख्यंते ॥

र	च	म	बु	गु	शु	श	उच्च
३८	२६	२३	२९	२५	३०	०	बलानि
३७	२५	२४	३०	२६	३५	३	
०	२९	२४	३४	२३	२२	२	

अथसप्तवर्गजमाह।स्वर्क्षेधर्मिति।स्वर्क्षेस्वावनेग्रहेधं०।२०।बलंस्यात्।सप्तभेसमराशेरष्टमांशः०।७।३०।मूलत्रिकोणेत्रयश्चरणाः०।१५।मित्रर्क्षेमित्रराशेरंशश्चरणः०।१५।अधीष्टभेअधिमित्रगृहेत्रयश्चांशाः०।२२।३०।वैरिणोराशेरष्टमांशकूःषोडशांशः०।२।३५।अध्यधिभेअधिशत्रुगृहेदंताशः०।५२।३०।रूपस्येतिसर्वत्रज्ञेयं।गृहाधिपवशात्।खेटस्यगृहाधिपवशात्।गृहादिसप्तवर्गपतिवशात्।सप्तवर्गाधीशोयादृशोस्तानेतत्स्तानोक्तानिस्वर्क्षेधर्मित्यादीनिसप्तबलानिग्राह्याणि।तेषांसप्तानामैक्यंबलंभवति।एतदुक्तंभवति।सूर्यादियत्रोयस्मिन्गृहेस्तितद्गृहस्वामिनःस्वर्क्षाद्यक्तंबलंग्राह्यं।एवंहो

११

रादिस्वामिनांग्राह्यं।अत्रकेचन।पादोनंतुबलंत्रिकोण९।५।गृहगेइति।ग्रहस्यगृहस्थानादेकादशमंपूर्वंगृह्यंतितदयुक्तं।सप्तवर्गजमितिसप्तसंख्यानियमात्।मूलत्रिकोणगृहेचेत्ग्रहोभवतितदाग्रहस्थानेमूमूलत्रिकोणजंबलंग्राह्यं।स्वर्क्षादिजंग्राह्यं।गृहाधिपवशात्।खेटस्यसप्तैक्यमित्यत्रकेचिदेवंवदंतेक्रियमाणबलस्यग्रहस्यगृहादिसप्तवर्गस्वामीयादृशस्तादृशस्यस्वर्क्षेधर्समभेषमइत्यनुरीत्याबलंग्राह्यमित्यादिवदंतितदसत्।अतःआचार्यगृहाधिपवशात्स्वर्क्षेधर्क्षसमभेषमः३स्त्रिचरणानुमूलत्रिकोणेबलंग्राह्यमित्यनूद्य।तेनगृहादिवर्गस्वामीस्वर्क्षादियद्गेहेस्तितदुक्तंबलंग्राह्यमितिप्रतीयते।अन्यथावक्ष्यमाणाश्रयगुणंकेयःस्वाधीष्वसुहृत्समार्यधिरिपोवर्गधृतिरित्यादिवदुक्तंस्यात्।अत्रनवर्गग्रहणं।गृहर्क्षभपदानांवाच्यत्वादनंतरोक्त्या

ख्येवसाध्वी। यतोगृहर्क्षपदानांगेहेएवशक्र्तानहोरादिष्वतोक्रियमाणबलस्य खगस्यगृहादिवर्गस्वामिनः यादृशेगेहेखेशक्र्तानहोरादिष्वंतेसंतिताद शबलंग्राह्यमित्युचितं दृश्यते॥ छ॥ मूलत्रिकोणानिबृहज्जातके। सिंहोवृष प्रथमषष्ठहयांगतोलिकुंभास्त्रिकोणभक्नामिभवंतिसूर्यात्।उच्चमूलत्रिको णसंदेहेकल्याणवर्मानिर्णयमाह।विंशतिरंशाः। द्वादशो भागामेषत्रिकोण मपरेखभंतुभौमस्य।उच्चमूलंकन्यायांबुधस्यतुंगांशोः१५सदाचिंत्यं।प रतस्त्रिकोणजातंपंचभिरंशैः ५स्वराशिजंपरतः।दशभि१०र्भागैर्जस्वस्य त्रिकोणमूलंस्वपरंचापे॥२॥शुक्रस्यतुतिथयोंशाः१५स्त्रिकोणमपरेघटेख राशिश्चकुंभेत्रिकोणंनिजभेरदिज्ञस्यरवेर्यथासिंहे॥३॥अथसप्तवर्गब लार्थंस्वाभाविकमित्रादयोज्ञेयाः। तत्रबृहज्जातकेउक्ताः। शत्रुमंदसितोस



मःसुरगुरुःसौरस्यचान्येरयोयेप्रोक्ताःसुहृदःस्त्रिकोणभवनातेमीमयाकी
र्तिताः॥२॥अथाधिमित्रादयोज्ञेयाः॥ तेच॥अन्योन्यस्यधनव्ययायसहज
व्यापारबंधुस्थितास्तत्कालंसुहृदस्त्रिकोणभवनेप्येकूरयस्त्वन्यथेति॥अ

शत्रुमंदसितोवर्त्मनिसर्गमित्रामित्र

र	च	म	बु	गु	शु	श	निसर्ग
चमंगु	रबु	रच	रश	रचमं	बुश	बुश	मित्र
चु	मंगु शुश	शुश	मंगु श	श	गम	गु	सम
शुश	०	बु	चं	बुश	रच	रचम	शत्रु

तात्कालिकमित्रामित्रचक्रं

र	च	म	बु	गु	शु	श	
चभो श	रगु बुश	रबुगु शुश	चम श	चम श	चम श	रबुम गुश	मित्र
बुगु शु	मंश	च	रगु शु	रबु शु	रबु शु	चं	शत्रु

त्रयहाणांपरस्परंयेधनव्ययासहजव्यापारबंधुस्थितास्तेतत्कालसुहृदो
भवंतिअनुक्तस्थानगाःशत्रवोभवंतिअस्योदाहरणं।सूर्याद्इंद्रश्चतुर्थः
उक्तस्थानमध्येस्तिअतोमित्रंसूर्याद्धोमोद्वादशोस्तिअतोमित्रं।सूर्याच्चनि
रेद्वादशोस्तिअतोमित्रंबुधगुरुशुक्राद्याःअनुक्तस्थानस्थाअतःशत्रवः।ए
वंचेष्टादीनामपिज्ञेयंअथतित्तत्कालेतुपुनश्चतानधिसुहृन्मित्रादिभिःक

र	च	मं	बु	गु	शु	श	ग्रहाः
०	गश	शुश	मश	श	म	गु	मित्राणि
चम	रबु	रगु	०	चम	श	शुबु	अधिमित्राणि
गश	०	चबु	रचशु	सू	चबु	रम	समाः
बु	मश	०	गु	०	गु	०	शत्रवः
शु	०	०	०	बुश	सू	चं	अधिशत्रवः

ल्पयेदित्यस्यफलितोर्थः। तत्कालमैत्र्यांनिसर्गमैत्र्यांयः मित्रंसाऽधिमित्रंस्यात्।
द्वयोः सकाशात्यः शत्रुसअधिशत्रुर्ज्ञेयः मित्रशत्रुत्वेसमः। मित्रसमत्वेमि
त्रं। शत्रुसमत्वेशत्रुः अस्योदाहरणं अथसप्तवर्गफलार्थंतावदधिमित्रा
दयोज्ञेयाः। तच्चकं। यत्तुलग्राद्व्यादयः। तच्चकं। यत्तुलग्राद्व्यादयः। केषु
स्थानेषुसंतीतिज्ञानार्थंलग्राद्भावाः साधिताः तथासूर्याद्व्यादयः केषुस्था
नेषुसंतीतिज्ञानार्थंसूर्याद्भावाः साधाः तत्ररव्यादीनांभावसाधनंयथा। ग्रह
एवरविः कल्प्यः तस्माद्वरमानीयरात्रिदलंकार्यं। तमिष्टकालंप्रकल्प्यग्रहं र
विंप्रकल्प्यलंकोदयेर्यल्लग्नंसाध्यंतच्चतुर्थभावोभवति। सः षड्भोदशम
भावोभवति। ग्रहः प्रथमभावोभवति। सएवद्वादिकः। सप्तमभावोभवति। १६
एतेभ्यश्चतुर्भ्यः प्राग्वत्भावसंधिसाधनंकेनविदाधुनिदृच्छतमेति। अ

तएवसिद्धसेनजातकमुक्तावल्यांग्रहभावसाधनमुक्तं। तद्यथा। एवंग्रहेभ्यः स्व
जनरूपखंडैः सूर्यादिभ्यथावत्समयंविदित्वा। रविंप्रयुक्तेननतात्प्रसाधयेद्भव
ततः प्रोक्तवद्देवभावाः। यद्वाग्रहेभ्यस्वनुरूपकेभ्योनिशार्धमर्कादिवसाधनी
यं। तन्नाडिकाभिर्घटिकाद्विलग्नंतुर्यंतितोभावविधिर्विधेयः। प्रयोजनंतस्यद
शात्रमादौकेंद्रादिगानामवरोधनंच। तत्कालमैत्र्यादिषुचात्रसम्यक्ज्ञेयं बुधै
र्यौक्तिकसंमतत्वात्इति। तन्न। प्रामाणिकैस्त्रिविक्रमनीलकंठश्रीधरश्रीपतिभि
रनुक्तत्वात्। अथसप्तवर्गजफलंचक्रं। तत्रसप्तवर्गस्वरूपं। ग्रहहोराद्रेष्काणस
प्तांशनवांशद्वादशांशत्रिंशांशाश्चेति। तत्रादौगृहस्वामिनः। क्षितिजसितज
चंद्ररविसोम्यसितावनिजाः। सुरगुरुर्यमसौरिगुरवश्चगृहांशपाइति। होरा
द्रेष्काणद्वादशांशत्रिंशांशकथनं। सूर्येंदोर्विषमे गृहे समगृहेहोरेमृगांका

र्द्रयोर्द्रेष्काणः।प्रथमस्यपंचनवपानांस्वाद्विषदृक्कोराक्षःभूपुत्रार्केगुरुज्ञभा
र्गवेत्रवाः पंचेधिभाद्रीषवस्त्रिंशांशाविषमेषुराशिषु बुधेः प्रोक्ताःसमेषूक्र
मात्।एषांपूर्वलिंतंयहेविषमराशौसतिपंचदशस्वाम्यंशेभ्यो भागेभ्योन्येसति

राशिस्वामिनोनवांशस्वामिनश्च												
मे	वृ	मि	कृ	सिं	क	तु	वृ	ध	म	कुं	मी	
म	शु	बु	च	र	बु	शु	म	गु	श	गु	उ	

होरास्वामिनः द्रेष्काणः चक्रं

विषमराशौ	सू	च	भौ	बु	गु			१	५	९		
	१५	३०		१५	३०			१०	२०	३०		

सप्तांशाः

१	२	३	४	५	६	७
४	८	१२½	२१	२५½	२९	
७	३०	५३	८	२५	४३	५९

नवमांशाः

१	२	३	४	५	६	७	८	९
३	६	१०	१३	१६	२०	२३	२६	३०
२०	४०	२०	४०	०	२०	४०	०	

द्वादशांशाः

१	२	३	४	५	६	७	८	९	१०	११	१२	
२	५	७	१०	१२	१५	१७	२०	२२	२५	२७	३०	
३०	०	३०	०	३०	०	३०	०	३०	०	३०	०	

विषमराशौत्रिंशांशाः

म	श	गु	बु	शु
५	५	८	७	५

समराशौत्रिंशांशाः

शु	बु	गु	श	म
५	७	८	५	५

होरास्वामीचंद्रः पंचदशभागेभ्योधिके होरास्वामीसू
र्यः।अथद्रेष्काणः।तत्रयहोराशिप्रथमत्रिभागेवर्त
तेतस्यराशिपतिरेवद्रेष्काणपतिः।यहःराशिद्वितीय
भागेवर्त्ततेतदाराशेःसप्तमात्यःनवमराशिपतिरेवद्रे
ष्काणपतिः।राशित्रिंशद्विभागेद्रेष्काणाधिपतिपूर्वलिंतं।अथसप्तांशाः।ग्रहभोग
मनिघ्नास्त्रिंशद्भक्ताभवतिसप्तांशाः।ओजेस्वराशिपूर्वंयुग्मेचंद्यानुसप्तमभा
दिति।अस्यपूर्वलिंत।विषमराशौग्रहेसतियथोक्तगुणनभजनंहत्वागतेनाने

DR BHAU DAJI

के०प्र० ३६

अथग्रहाणां द्वादशवर्गस्थानचक्रं ॥

र	च	म	बु	गु	शु	श	ग्रहाः
बु	बु	शु	स्व	बुअ	बुध	मंग	गृह
रोबु	अधिमि	मित्र		धिश	सम	सम	
स्व	स्व	मूअ	सूर्य	सू	चंद्र	रवि	होरा
		धिमित्र	सम	सम	सम	सम	
शुअ	रा	रानि	शु·स	बुधअ	शुअ	रवि	द्रेष्का
धिश	राबु	मित्र	म	धिश	मित्र	सम	
बुश	शु	स्व	स्व	सूर्य	मंग·	चं·अ	सप्तमां
शु	मित्र			सम	मित्र	राबु	श
शम	भौम	चंद्र	रानि	स्व	स्व	सूर्य	नवमां
म	राबु	सम	मित्र			सम	श
मअ	रानि	रानि	म	बु·अ	मंग	बु·अ	द्वादशां
धिमि	राबु	मित्र	मित्र	राबु	मित्र	मित्र	शाः
गु	गु	त्रि	गु	गु	स्व	गुमि	त्रिंशांशाः
मित्र	मित्र	मित्र	राबु	मित्र		त्र	

नसप्तमांशमानेनस्वराशेः सकाशात्सप्तमांशपतिर्ज्ञेयः।समराशौ ग्रहेसतिअ
नेनसप्तमांशमानेनस्वराशेः सका
शात्सप्तमांशपतिर्ज्ञेयः।अथनव
मांशाः तत्राद्याः क्षेत्रेषुक्रियनक्रतौ
निकूकुलीराद्यानवांशाः क्रमात्अ
स्यफलितं॥मेषसिंहधनुषस्थिते
ग्रहेअनेननवमांशमानेनमेषाद्ग
णना क्रमः॥वृषकन्यामकरास्तत्र
ग्रहेसतिमकराद्गणनाक्रमः॥मि
थुनतुलाकुंभास्तत्रस्थे ग्रहेतुलातो

बलग्रहणचक्रं

मू	स्व	मि	अमि	श	अ	स०
०	०	०	०	०	१	०
५५	३०	१५	२२	३	५२	७
०	०	०	३०	५५	३०	३०

ग्रहाणांसप्तमेवर्गजंफलं

र	च	म	बु	गु	शु	श
१	१	१	१	१	१	१
३५	३१	१२	३५	५५	५५	३
३	५२	२५	३	५२	०	३
३०	३०	०	३०	०	०	३०

गणनाक्रमः।कूर्कवृश्चिकूमीनस्थेग्रहेसतिक
र्कात्गणनाक्रमः।अथद्वादशांशाः।अनेन
द्वादशमानेनस्वराशेःसकाशात्गणनाक्र
मः।अथसप्तवर्गबलार्थंपूर्वोक्तानिलिख्यंते।
अथसप्तवर्गबलोदाहरणं॥रविर्गृहाधीशो
बुधः स्वक्षेत्रेस्तितेनरूपार्धंगृहबलं०।३०।०
होरेशोरविः शत्रुक्षेत्रेस्ति अंतोषोडशांशंबल
लं०।३।५५।द्रेष्काणाधीशःशुक्रःसमगृहे
स्तितेनअर्धमांशंबलं०।७।३०। सप्तमांशाधीशोबुधःस्वक्षेत्रेस्तितेनरूपार्धबलं

०।२०।०।नवमांशाधीशः।रानिःसमगृहेस्तितेनअष्टमांशः०।७।२०।द्वादशांशपतिर्भौमःमित्रगृहेस्तितेनचतुर्थांशंबलं०।१५।०।त्रिंशांशपतिःगुरुःअधिशत्रुभेस्तितेनदंतांशंबलं०।१।५२।२०।एवंचंद्रादीनामपिज्ञेयं।अथयुग्मायुग्मबलंचाह।शुक्रेंदुःसमभांशकेहिविषमेचेद्वराघ्रिबलंकेंद्रांघ्रिषुचरूपकार्धचरणान्यच्छंतिखेटाःक्रमात्॥स्त्रीखेटौचरमेनराःप्रथमकेक्लीबास्तुमध्यगताद्वेक्षाणेवितरंतिपादमुदितंस्यात्स्थानवीर्यंहिदं॥६॥शुक्रेंदुसमभेंशकेवास्तितौशुक्रेंदूचंद्रांघ्रिरूपांघ्रिबलंदद्युः।भंचअंशकश्चभांशकंइत्यत्रद्वंद्वैकवद्भावः।समंचेतद्भांशकंचसमभांशकंतस्मिन्।समंस्त्रीभवनं।विषमंपुरुषभवनं।अत्रश्रीपतिटीकायांअंशेमुख्यत्वमुक्तंदसत्।यतःसर्वेषांजातकं

कोराणंमतंनस्यात्।उक्तंचलघुजातके॥चंसितौस्त्रीक्षेत्रेपुरुषक्षेत्रौपगाःशेषाइति।एवमन्येष्वपियंथेषुक्षेत्रंराशिरेव।राशिसमोंशस्ततोत्रापिबलंस्यात्।यद्युतयोःराशिर्नवांशश्चेतिद्वयमपिसंभवतितदाएकचरणएवबलं।नचरणद्वयबलं॥अथकेंद्रादिबलंकेंद्रेति॥केंद्राद्येषुकेंद्रपणफरआपोक्लिमेषुस्थिताग्रहाःक्रमेणरूपार्द्धचरणान्यच्छंति॥तथाचयोग्रहःकेंद्रे१।५।७।१०।भवतितस्यरूपंबलं१योग्रहःपणफरे२।५।८।११।स्तितस्यरूपार्द्धबलं।०२०।०।योग्रहःआपोक्लिमे३।६।९।१२।स्तितस्यरूपचरणोबलमि०।१५।०।केंद्रादिस्वरूपमुक्तंबृहज्जातके।कंटकेंद्रचतुष्टयसंज्ञाःसप्तमलग्नचतुर्थस्वभानांकेंद्रात्परंपणफरंपरतश्चसर्वमापोक्लिममितिअस्योदाहरणं।

सू	चं	मं	बु	गु	शु	श	युग्मायुग्म
०।१५	०।१५	०।१५	०।१५	०।१५	०।१५	०।१५	बलचक्रं

केंद्रे शनिस्तस्य रूपं बलं १। पणफरे भौमस्तस्य रूपार्धं बलं ०।३०।०। आपोक्लिमे रविचंद्रबुधगुरुशुक्रस्तेषां पादो बलं ०।१५।०। एवं जातानिसर्वेषां केंद्रादिबला निएकत्रलिख्यंते। अथ द्रेक्काणबलं। स्त्रीखेटाविति॥ स्त्रीखेटौचंद्रशुक्रौ चरमे तृतीये द्रेक्काणे यदि भवतः तर्हि तयो र्बलं रूप-चतुर्थांशो भवति।०।१५।०। एवं नपुंसकाः रविभौमगुरवः प्रथम द्रेक्काणे यदि भवंति तर्हि पादो बलं ०।१५।०। यच्छंति एवं नपुंसकग्रहौ बुधशनैश्च रौ द्वितीय द्रेक्काणे यदि भवतः तर्हि पादं बलं यच्छंतः। इदं पंचविधं स्थानबलमुदितं स्त्रीयहादिस्वरूपमुक्तं बृहज्जातके। बुधसूर्यसुतौ नपुंसकाख्यौ शशिशुक्रौ युवती नराश्च शेषाः। इति। उदाहरणं। शुक्रस्तृतीये द्रेक्काणे इति अतः पादो बलं ०।१५।०।

	सू	च	म	बु	गु	शु	श	केंद्रादिबलचक्रं
	०।१५	०।१५	०।३०	०।१५	०।१५	०।१५	०।०	

गुरुः प्रथमे द्रेक्काणे स्ति अतः पादो बलं ०।१५।०। बुधो मध्यमे द्रेक्काणे स्ति अतः पादं बलं ०।१५।०। एवं जातानि सर्वेषां द्रेक्काणबलानि लिख्यंते अथ दिक्बलमेकत्रैकारं॥ मंदाल्पभिताक्षुकुजाच्च हिबुकं शोध्यं विधोर्भार्गवान्माध्यंज्ञा द्गुरुतोस्तमत्ररसभा क्त्वषंत्यजेच्चक्रतः॥

द्रेक्काणबलचक्रं							पंचानायोगेस्थानबलं						
र	च	म	बु	गु	शु	श	र	च	म	बु	गु	शु	श
०।०	०।०	०।०	०।१५	०।१५	०।१५	०।१५	३०।०	२८।०	२८।०	२०।०	२३।०	३।०	२८।०
०।०	०।०	०।०	०।०	०।०	०।०	०।०	२०।०	१७।०	६।०	८।०	८।०	३५।०	१७।०
							३०।०	२८।०	२८।०	२८।०	२३।०	२३।०	२८।०

दिग्वीर्यरसं हृत्व - - मथजं रूपं सदास्याद्दिदास्त्रिंशा ३० इक्कनतोन्न - - - - - - - - - - - - - - - ॥७॥ मंदाल्पभिनि। मंदाच्छनैश्चरात्स्वभं शोध्यं। इनात्सूर्यात्। कुजात्। भौमात्। हिबुकं चतुर्थभावः। शोध्यः विधोश्चंद्रात्

भार्गवात्शुक्रात्मध्यं दशमभावः शोध्यं। ज्ञातबुधात्गुरोश्च अस्तंसप्तमभावः शोध्यः। शेषंरसभात्त्यक्तषड्भाधिकंचक्रात्त्यजेन्नवादशराशिभ्यस्त्यजेदित्यर्थः। षड्भादत्यंयथास्थितएव। तद्राश्याद्यंषड्भिर्भाज्यंरूपाद्यं। दिग्वीर्यं। दिग्बलंभवतीत्यर्थः। अत्रभजनप्रकारस्तूडुबलानयनेप्रागुक्तोत्रज्ञेयः। उदाहरणं। लग्नं ०।२२।१२।४६। मंदात् ०।१३।३८।५२। शोधितं ११।२१।२६। ६। इदंरसभात्पुष्टंअतोभगणाच्युतं ०।८।३३।५४। रसहतलब्धं रानिदिग्बलं। ०।२।५१।१८। एवंसर्वेषांरव्यादीनांदिक्बलं। अथकोलबलं। तच्चतुर्धा। नतोन्नतबलं। पक्षबलं। पक्षबलं। दिनरात्रिषुत्रिभागबलं। स्वहोरादिनमासाब्दबलं। तत्रादौनतोन्नतबलमाह। नतेति। अथदिग्बलानंतरंसमयजंकालबलंउच्यते। अथइति। अत्रविदः बुधस्यसदादिवारात्रौरूपमेवबलंस्यात्। नतंत्रिंशद्गुणंलब्धंतत्राशिकुजाकर्णांचंद्रभौमशनैश्चराणांबलंस्यात्। उन्नतंत्रिंशद्गुणंयल्लब्धंतदेवपरेषांरविगुरुशुक्राणांरूपादिबलंस्यात्। अस्योदाहरणं। नतं। २४।५६। त्रिंशद्गुणं ०।४९।५२। राशिकुजार्कीणांबलंस्यात्। उन्नतंत्रि ५।४। शाद्गुणंलब्धंरविगुरुशुक्राणांबलंस्यात् ०।१०।८। बुधस्यरूपंबलं। एवंजातंसर्वेषां नतोन्नतबलं। तच्चक्रंलिख्यते। अथपक्षबलं। शुक्लेतिथि १५ हतेष्वतिथयोवीर्यसंज्ञाभ्युतंपापानांद्विगुणंविधोरिदमथोन्नत्यंशकेयुक्तमात्। सौम्यार्कार्किभुवांनिशःशशिसितारात्रौंचरूपंसदेज्यस्यार्धाधिचया द्बलीकिलसमामासद्यु

नतोन्नतबलंचक्रं						
र	च	म	बु	गु	शु	श
०	०	७	८	०	०	७
२०	२९	२२	७	२०	२०	२२
८	५२	५२	०	८	८	५२

रव्यादीनांदिग्बलं						
र	च	म	बु	गु	शु	श
९	७	२५	७	२२	२	२
२४	७	२५	५३	३२	२३	२५

१९

होरेश्वरः॥८॥ शुक्लेत्येति॥ शुक्लपक्षेगतातिथयः सावयवाः ग्राह्याः। अंत्येकृष्ण पक्षेएष्यतिथयः सावयवाग्राह्याः। तापंचदशभिर्भाज्याः १५ लब्धेरूपादिशुभग्र हाणांचंद्रबुधगुरुशुक्राणांपक्षबलंस्यात्। इदंअत्रागतंबलंविधोश्चंद्रस्यद्वि गुणंकार्यं। चंद्रस्यवक्ष्यमाणचेष्टाबलमपिपक्षबलतुल्यंरूपमेवस्यात्। अतः कारणात्। चंद्रस्यपक्षबलंद्विगुणितंकार्यं। अत्रकेचित्क्षीणचंद्रंपापग्रहमिच्छंति तदसत्। पापयुक्तःबुधःपापः। चंद्रस्ययवनेश्वरवाक्यबलात्। शुभत्वमेवदृश्य ते। बुधस्यतुसर्वसंमतत्वात्पापयुक्तःपापः॥ यथाचयवनेश्वरः। क्रूरग्रहोर्कःकु जसूर्यजौतुपापौशुभाःशुक्रेशशांकजीवाः। सौम्यस्तुसौम्यायदिमिश्रितोन्यैः पापैश्चतुल्यफलमत्वमेति। सारावल्यामपि॥ शुक्लप्रतिपदादेमध्यमबलः कीर्त्यते। यवनवृद्धेः। श्रेष्ठोद्वितीयदशकेस्वल्पबलचंद्रमास्तृतीयेचाअत्रच २०

द्रस्यतृतीयदशकेपापत्वंब्रूयान्नाल्पबलत्वं। तथाचक्षीणचंद्रमाःपापइतिअन्य मतं। एवंमतभेदेपडुति कारेर्यविनेश्वरमतमेवांगीकृतं। यतश्चंद्रस्यचेष्टाकेंद्रज बलंपक्षबलंचसममेवभवतीत्यस्योदाहरणंपौर्णिमांतेगतातिथयः पंचदशभ्यः कोपिपंचदशेतिचंद्रस्यपक्षबलरूपं। पौर्णिमांतेचंद्रस्यचेष्टाकेंद्रजबलंरूपं। तद्य था। व्यर्केंदुरिति। चंद्रात्सूर्यशोधितेषड्राशिपरिमितं। अत्रभाजकोपिषड्इति। चंद्रस्य चेष्टाबलंरूपंइतितुल्यं। अमांतेएष्यतिथयःशून्यंभाजकः पंचदश। इतिचंद्रस्यपक्ष बलंशून्यं। अमांतेव्यर्केंदुरिति। चंद्रात्सूर्यशोधितेशून्यं। भाजकः षड्इतिचेष्टाबलं शून्यंइतितुल्यं। अतोद्विगुणेमित्यनूद्यं। चंद्रस्यपापत्वेंगीकारेअमांतेफलद्वयतुल्य तानायाति। तथा। अमांतेशुभस्यपक्षबलंशून्यं। इदंरूपमध्येशोधितंसत्। पापग्रहा णांफलंरूपतुल्यंभवति। चंद्रस्यपापत्वात्पक्षबलंरूपं। अमांतेचंद्रस्यचेष्टाबलंशू

शून्यं बलं न्यूनतिप्रत्यक्षविरोधात् कृष्णपक्षचंद्रस्यशुभतैवेतिसिद्धं। द्विजराजस्य येपापत्वंवदंतितएवपापिनः। चंद्रस्यशुभत्वांगीकारात्। क्षीणचंद्रयोगेबुधस्यशुभतैवेतिसिद्धं। अतः पक्षबलानयनेचक्रार्धहानौतनुगेखलेरत्यादिनातनुस्थचंद्रस्यशुभतैव। बुधस्यतुयथाप्राप्तापापताशुभतावाग्राह्या। एवंमतेरिष्टयोगादौयत्रचंद्रस्यपापत्वाभिधानंतत्राल्पबलत्वंबोध्यं। अथपक्षबलानयनं। तत्रत्रैराशिकं पंचदशभिः१५। रूपंबलं। तदागतेष्वतिथिभिः किं। गतेष्वतिथीनामानयनंविरविचंद्रलवाद्वादशभिर्भाज्याः गततिथयोभवंति। शुक्लपक्षेकृष्णपक्षेविरविचंद्रलवालवाभांशेभ्यः ३६०शुद्धाः कार्याः द्वादशभिर्भाज्याएष्यतिथयोभवंति। द्वादशभागतुल्येसूर्यचंद्रांतरेएकातिथिर्लभ्यतेअतःकारणात्रविचंद्रलवाद्वादशभिर्भक्ताः कार्याः। अस्योदाहरणं। सूर्यः २।१४।२०।५८।

चंद्रः ५।१२।२५।३२। विरहितचंद्रलवाः ८८।४।३४। द्वादशभिर्भक्ताः लब्धाः गततिथयः७। शेषं ४।४।३४। षष्टिगुणितं २४४।३४। द्वादशभिर्भक्तंलब्धं घटिकाः २०। पुनः शेषं ४।३४। षष्टिगुणितं २७४। द्वादशभिर्भक्तंलब्धं पलानि २२। पक्षबलार्थंसावयवागततिथिः ७।२०।२३। एताः पंचदशभिर्भक्ताः लब्धंशुभग्रहाणांबलं ०।२९।२१। इदंरूपाछोधितंपापग्रहाणांबलं ०।२०।२९। शुभबलेद्विगुणं।०।५८।४२ इदंचंद्रस्यपक्षबलंलिख्यते। पक्षबलचक्रं॥ अथत्रिभागबलं। अथेति। दिवसस्य प्रथमेत्र्यंशेजन्मतर्हिसौम्यबुधस्यरूपंबलं॥ द्वितीयेत्र्यंशेअर्कस्यरूपंबलं। तृतीयेत्र्यंशेशनेः रूपंबलं। एवरात्रेः प्रथमेत्र्यंशेचंद्रस्यद्वितीयत्र्यंशेशुक्रस्यतृतीयत्र्यंशेभौमस्यरूपंबलं।

पक्षबलचक्रं

र	च	म	बु	गु	शु	श
०	०	०	०	०	०	०
३०	५८	३०	३०	२९	२९	३०
३९	५२	३९	३९	२१	२१	३९

स्यात्। सदासर्वदाईज्यस्यगुरोः रूपंबलंस्यादित्यर्थः। उदाहरणं। अथरात्रिमानं ३०। १२। अस्यत्र्यंशाः ९।४। रात्रेस्तृतीयत्रिंशेजन्मास्ति अतोरूपंभौमस्यबलं १।०।०। गु रोरपिरूपंबलं १।०।०। सदेज्यस्येत्युक्तत्वात्। एवंजातंसर्वेषांत्रिभागबलं। त्रिभा गबलचक्रंलिख्यते। अथवर्षादिबलमाह॥ अथेत्यधिकारे। पादवृद्ध्यासमामास द्यहोरेश्वराः क्रमेणबलिनः स्युः। अत्रजात्य भिप्रायेणैकवचनं। एतदुक्तं भवति। वर्षाधि

त्रिभागबलचक्रं

र	चं	मं	बु	गु	शु	शी
०	०	१	१	१	१	०
१	१	१	१	०	१	१
१	१	०	१	१	०	०

पायोग्रहः स्यात्तस्यैकपादोबलंस्यात्। योमासाधिपस्तस्यपाद द्वयं। योहो २२
राधिपः कालहोराधिपतिस्तस्यपादचतुष्टयंबलंस्यात्। वर्षत्रयमासेशयोरा

नयनार्थंश्रीकेशवदैवज्ञैः स्वीकायांसुगमोपायः कृतः सोत्रलिख्यते। द्यष्टोद्यूपिं डोरदभू १३२ युतोर्कयुक् १२ खांगाग्नि २६० हृत खाग्निहृ २० तः फलेयुतेवे दैर्गुणे ४।२। द्विस्त्रिहृतेदि ७ शेषेऽर्कोङ्गसतुल्यैकरणे ह्यमासपो। उदाहरणं। गणेशदैवज्ञः विश्वेद्वाग्भ्यरणे १२३१२ र्युग्नोग्रहलाघवजोगणः चक्र घ्नृप खा० ध्या ४०१६ द्योऽत्रसतुल्यगणोभवेत्। १। विश्वनाधीग्रहलाघवोदाहृति पत्रे ४। अत्रसतुल्यादहर्गणः १४७३०५ द्विघ्नः १४७३०५ एकत्रेरदभू १३२ युग्नः १४७४३७ अपरत्रार्कयुग्नः १४७३१७ प्रथमः। खांगाग्निहृतो ३६० लब्धः ४०१। द्वितीयः खाग्निहृतोलब्धं ४९१० प्रथमंवेदयुतं ४१३ द्वितीयंगुणयुतं ४९१३ प्रथमंत्रिगुणं १२३९ द्वितीयंगुणं ९८२६ उभयत्रसप्तभक्ते ७ शेषं०।५ वर्षमासेशोधोगनयनसूर्यसिद्धांतेसूच्यहर्गणादुक्तं। एतौसाधनौ। तथा। श्री

पतिपद्भौकल्पाहर्गणेदानीतौतथाब्रह्मसिद्धांतेपिस्पष्टमुक्तंसर्वसंमतंच। वर्षे
शोरविः।मासेशोभृगुः।अत्रगतवाराविगतौ।अथग्रहलाघवाहर्गणाद्वर्षेरामासे
रायोरानयनार्थंश्रीमद्गणेशदैवज्ञोक्तः प्रकारोलिख्यते। द्विष्टोयंग्रहलाघवद्यूनि
चयश्चक्राहतैःषड्भैरुद्धृतैश्च२६युतःसबाणतपनः१२५सेषुश्चखा
गाग्निभिः।२६०॥खाब्ध्याशौ३०विहृतःफलेगुणयमघ्नेचत्रिनिघ्नाक्ष५खोपेतो
द्वित्रियुतेनगोवरितगैस्तोकैस्समामासपौ।।१।।अस्योदाहरणं।ग्रहलाघवद्यू
निचयः९६।द्विष्ठाः९६।एकत्रचक्राहतैःषड्भैः२३६युतः४३२अपत्र
चक्राहतैःषड्दस्रैः१५६युतः२५२प्रथमःसबाणतपनः५५७द्वितीयःसेषुः
२५७प्रथमःखांगाग्निभिः३६०हृतःफलं१।द्वितीयःखाब्ध्याशैः३०हृतःफलं २२
८।प्रथमं१गुण२घ्नं२द्वितीयंयम२घ्नं६प्रथमं२चत्रिनिघ्नाक्ष३०युतं३२

द्वितीयं१६चक्रघ्नशून्यं०युतं१६।प्रथमंद्वियुतं३५।द्वितीयंत्रियुतं१९।उभयत्रापिस
प्तभक्ते७शेषं०।५।पूर्वोक्तावेववर्षरामासपौज्ञातौ॥अथहोरेशानयनं।अत्रौदौ
वारप्रवृत्तिमाह॥चरार्धदिनांतरयोर्विशोधयोगोत्पयानीयपलैश्चसम्यक्।सूर्योद
याद्ऊर्ध्वमृणेधनेधोवारप्रवृत्तिंमुनयोवदंति॥वारप्रवृत्तेर्घटिकाद्विनिघ्नाः कार्ता
स्यहोरापतयः शरा५प्ताः।दिनाधिपाद्धारविशुक्रसोम्यशशांकसौरीज्यकुजाःक्र
मेण॥२॥दिनपतेःसकाशात्गणनाक्रमः२।शु।बु।चं।श।जी।भौ।रेखातः प
श्चिमयोजनानिधनानि४।खांघ्रूनानि१जातानि३।देशांतरपलानिधनानिश्च
रपलानि८५ऋणं।उभयोर्धनर्णयोरंतरं८१ऋणं।सूर्योदयाद्ऊर्ध्वमृणेइत्यन्व
यात्।सूर्योदयाद्ऊर्ध्वंआभिर्घटीभिः१।२१।जातावारप्रवृत्तिः।अत्रेष्टकालःसूर्योदया
त्५१।२८।वारप्रवृत्तिऋणघटीभि१।२१हीनः५०।७।अथैतावारप्रवृत्तेः सका

शात्घटिकाः५०।७। द्विघ्नाः १००।१४। शराप्ताः लब्धंगताः कालहोराः २०। चंद्राद्गणनेवर्त्तमानबुधहोरादिनेशाः प्रसिद्धाः। अत्रचंद्रः दिनेशइति। अथचेष्टाबलंतद्विविधं। आयनबलं चेष्टाबलंच॥ सदाक्रांतिभागे र्युताज्ञस्यसिद्धाः १४। शनींद्वो र्युतोनाः क्रमाद्याम्यसौम्यै॥ वि लोमंपरेषांगजांभोधि ४८ भ

वर्षमासदिनहोराधिपचक्रं			
व	मा	दि	हो
रव	शु	च	बु
०	०	०	०
२५	३०	३०	१

चतुर्णांयोगेकालबलं						
र	चं	मं	बु	गु	शु	शं
०	२	२	१	१	०	१
५५	३३	२०	३०	३९	९	२०
७	३४	३१	३९	२९	२९	३१

भक्ताभवेदायनंवीर्यमर्कस्य द्वि२घ्नं॥ ९॥ सदेति। ज्ञस्यबुधस्ययाम्यसौम्येः क्रांतिभागैः सदासिद्धाश्चतुर्विंशतिः २४युक्ताः कार्याः। शनींद्वोः शनिचंद्रयोः क्रांतिभागैर्याम्यसौम्यैः क्रमात्सिद्धाः २४। युतोनाः कार्याः सौम्यैर्युक्ताः सौ २५

म्यैरूनाः। परेषां रविभौमगुरुशुक्राणांविलोमं। तद्यथा। सौम्यैः क्रांतिभागैः सिद्धा २४ युताः कार्याः। याम्यैरूनाः कार्याः। सर्वेगजांभोधि ४८ भक्ताः। अष्टचत्वारिंशद्भक्ताः रूपाद्यायनबलंस्यात्। एतदर्कस्यसूर्यस्यद्विघ्नंद्विगुणंकार्यं। यतोवक्ष्यमाणचेष्टाबलं। भौमादीनामेवोत्तमस्मिन्चंद्रसूर्ययोः। यच्चंद्रस्यपक्षबलंतदेवचेष्टाबलं। यत्सूर्यस्यायनबलंतदेवसूर्यस्यचेष्टाबलं। अतः कारणात्पूर्वमेवद्विगुणंकृतं। यदित्ववक्ष्यमाणंचेष्टाबलंपश्चात्लिख्यतेतदाप्रागानीतंसूर्यस्यायनबलंचंद्रस्यपक्षबलंचयथास्थितमेवस्थाप्यंनद्विगुणमिति॥ इहायनबलार्थंप्रथमतोग्रहाणांक्रांतयःवक्तव्याः। तत्करणप्रकारश्चयहलाघवेसुः। खंडानिखंडावार्धयोवरहताः त्रीलाग्नयोऽध्यग्नयस्त्रिशनत्वधृतीनवाग्निधय ४७।६०। ३७। ३४। २७। २५। १८। १२। ४। स्तैः सायनांशग्रहात्। बाह्वंशाभ्रकु १०। भौ

गसंख्यक्युतिः शेषैष्यघाताद्दृग्१० ह्याटयदिग्वि१० हृतास्तवादिरपमस्तद्विकूस्वगोत्रा
ङ्गवेत्। उदाहरणं। रविः २।१४।२०।५८। अयनांशाः १७।५१। सायनो रविः ३।२।५।५८
अस्यभुजांशाः ८७।५५।२। दृग्भक्ताः लब्धं ८ गतखंडानि ८ गतखंडयोगः २३६।
शेषं ७।५५।२। एष्यखंडकेन ४ गुणितं ३१।५७।८। दृग्हृतं लब्धं ३।१०।०। अनेनग
तखंडयोगो २३६। युक्तः २३९।१०।०। दृग्हृतो लब्धंतवाघारवे रुत्तराक्रांतिः २३।
५५।०। सायनग्रहे मेषादिषड्के सतिउत्तराक्रांतिः। तुलादिषड्के सतिदक्षिणाक्रां
तिः एवंचंद्रादीनामपिक्रांतिसाधनं। उदाहरणं॥ बुधस्यक्रांतिभागउत्तरा २३।५६।
५८। एतैः सिद्धयुक्ताः ९७।५६।५८। गजांभोधिभक्ताः फलं रूपाद्यंआयनबलंबुध
स्य ०।५१।५६। शनिक्रांतिभागाउत्तराः २०।१०।१०। युतोनाः क्रमाद्याम्यसौम्येरित्यु
क्तत्वात्। एतैः क्रांतिभागैः १२।१०।१०। सिद्धा २४। ऊनाः ११।४९।५०। गजांभोधि

क्रांतिभागाः						
र	च	मं	बु	गु	शु	श
२३	७	२२	२३	२३	२१	२२
५५	१८	५६	५१	२४	२०	
०	३३	५८	९	३९	२०	
उ	द	उ	उ	उ	उ	उ

भक्ताः लब्धंरूपाद्यंआयनबलंशनेः ०।१४।५७। रवि
क्रांतिभागाउत्तराः २३।५५।०। विलोमंपरेषामित्युक्त्वा दैतैर्भागैर्युताः सिद्धाः ९७।५५।०। गजांभोधि
भक्ता लब्धंरूपादिबलं ०।५९।५३। सूर्यस्यदृग्भमि
त्युक्त्वात् द्विगुणं १।५९।४६ इदं सूर्यस्यायनब
लं एवंसर्वेषांजातमायनबलंलिख्यते। एतत्साय
नबलंकेश्चित्शरसंस्कृतक्रांत्योक्तं। तदसत्। तदेतत् दूषितंगणकचक्रचूडामणि
भिःश्रीकेशवदैवज्ञैः। यतोग्रहस्यंयाम्योत्तरश्रितस्यमुख्यं नअयनंगमनंक्रांतिव
शादेवनशरवशात्। यतोग्रहस्यशरःक्रांतिसूत्र एवनपृथक्। अतोग्रहस्यमुख्य
बलंक्रांतिवशादेव। तदुक्तंमहताग्रबंधेनसिद्धांतशिरोमणौ। बलंनानयनेक्षे

आयनबलचक्रं

र	चं	मं	बु	गु	शु	श
५२	३०	५७	५१	५२	५१	०'
४६	४	५३	५६	५८	३	७

पः। क्षिप्तोयैस्तेकुबुद्ध्यइति। अथचेष्टाबलमाह। म
ध्यस्पष्टेति। मध्यग्रहस्पष्टयहयोगदलं। तेनहीनंशी
घ्रोच्चंकुजादीनांचेष्टाकेंद्रंस्यात्। तच्चेत्षडधिकंभ१२
गणान्युतंक्रायं। षडुत्क्रमंयथास्थितमेव। षड्भिर्भाज्यंचे
ष्टाबलंस्यात्। भजनप्रकारस्तूच्चबलानयनेउक्तः सोत्रज्ञेयः। उदाहरणं। मध्यमो
भौमः०।२४।४०।३८। स्पष्टोभौमः७।२१।२४।५१।४६। युतिः२।१६।२६।२४। द
लं१।८।५२।१२। मध्यमोरविः भौमस्यशीघ्रोच्चं२।१४।१२।२५। दलेनहीनंजातं
भौमस्यचेष्टाकेंद्रं१।५।५९।१२ षड्हृतभौमस्यचेष्टाबलं०।११।५९।४४।
एवंसर्वेषांचेष्टाबलानिलिख्यंते। अथनैसर्गिकबलमाह। स्यादिति। उदाहर २६
णं। रूपं१ सप्तहतंशनैर्नैसर्गिकबलं०।८।३४। त्रयंसप्तभक्तं भौमस्यबलं०।

मध्यमस्पष्टयोर्दलं

म	बु	शु	गु	श
३	२	२	२	०'
१३	२३	२५	२९	१५
१३	२३	२२	२९	१५
१२	३	२८	२९	१५

शीघ्रोच्चानि

मं	बु	गु	शु	श
२	८	२	३	२
१२	२३	२५	३	२५
१२	२३	२२	२९	२५
२५	२१	२५	२९	२५

चेष्टाकेंद्राणि

म	बु	गु	शु	श
५१	६	८	०'	२
५९	१०	३९	८	११
१२	५८	३१	७	२०

चेष्टाबलं

मं	बु	गु	शु	श
०'	५६	३	६	२०
५९	३२	५३	५३	३३
५९	२५	८	५३	३६

द्वयोर्योगेचेष्टाबलंस्पष्टं

र	चं	मं	बु	गु	शु	श
३२	०'	२	५६	३२	५२	३२
५९	५९	५२	३५	८	५२	५०

१७।८। त्रयंसप्तभक्तं बु
धस्य०।२५।७३। चतु
ष्टयंसप्तभक्तं गुरोःबलं
०।३४।१७। पंच५सप्त
भक्तं शुक्रस्यबलं०।१२।५१। षड्घ्नसप्तभक्तं चंद्रस्यबलं०।५१।२५। सप्तसप्त
भक्ताः रविबलं१।०।०। इदंनिसर्गबलंसदास्थिरमेव। एवंजातानिसर्वेषांनिस

र्गबलानि॥ ५०॥ युद्धेबाणवियोगहृत्वचरयोर्वीर्यैक्ययोरंतरंस्वेसौम्यस्यखगेक्षयंच
वमादिक्संस्थस्यकुर्याद्बले॥ सदृष्यंघ्रियुगयदृष्टिचरणेनखंरवीर्यंभवेद्भावानाबल
मीशजंनृचतुष्पादारव्यकीटंबुजाः॥ ५१॥ युद्धेति। यदाकदाविज्ञन्मकालीनयोर्ग्रहयो
र्युद्धेसतितेयोवीर्येक्ययोःस्थानादिकंपूर्वोक्तबलैक्ययोरंतरंकार्यं। ग्रहयोःकालात्मै

नैसर्गबलचक्रं						
र	चं	मं	बु	गु	शु	श
१०	५१	२०	५५	३०	५३	४०
०	५३	४०	५३	४०	५१	३०

कौबाणौसाध्यौ। वीर्यैक्ययोरंतरंबाणयोरंतरंभा
ज्यं। यद्दृष्यंतदुत्तरंदिशिस्थितस्यग्रहषड्बलेस
हितंकार्यं। दक्षिणेदिशिस्थितस्यग्रहस्यषड्ब
लेहीनंकार्यं। अयंसंस्कारश्चेष्टाबलभेदः॥ तत्रयु
द्धलक्षणं। युद्धंतुभौमादिपंचकस्यैव। उक्तंचविष्णु
गुप्तेन। दिवसकरेणास्तमयः। समागमःशीतरश्मिसहितानां। कुसुतादीनांयु

द्धंनिगदतेन्योन्ययुक्तानामिति। नन्वेवंसतिसूर्यसिद्धांते। ताराग्रहाणामन्योन्यंस्या
तांयुद्धसमागमौ। समागमःशशांकेनसूर्येणास्तमयःसह। ताराग्रहाणांभौमादी
नांपंचानांयुद्धस्यसमागमस्यचोक्तत्वात्। भौमादीनांअन्योन्यसमागमेसंस्काराभा
वःप्रसज्येत। बाढं। तत्रापिसंस्कारस्वीकारः। यतस्तत्रैवभौमादीनांसमागमलक्षण
मुक्तं। समागमोशादधिकेभवत्श्चबलान्विताविति। भौमादीनांसमागमलक्षणाभा
वेअर्थाद्युद्धमेव। अत्रोदाहरणेमिथुनेर्के १८ बुध २२ गुरु८ शुक्राः २५ सतिपरमे
कांशेनसंतीतियुद्धलक्षणाभावः। अथदृग्बलमाह। सदृष्यंघ्रियुगग्रदृष्टिचरणे
नंखेदृवीर्यंभवेदिति। खेदृवीर्यस्थानादिपंचबलयोगेनजातंयत्ग्रहबलंतत्।
सदृष्यंघ्रियुक्कार्यं। उग्रदृष्यंघ्रूनंकार्यं। एतदुक्तंभवति। यंग्रहंप्रतिग्रहाणां
यादृष्यःसंतितन्मध्येशुभग्रहदृशीनांऐक्यंहत्वाचतुर्थांशोग्राह्यः। तद्भानार्थं

ग्रहदृक्बलं। पापग्रहदृष्टीनां एकंकृत्वा चतुर्थांशोग्राह्यः तदृणाख्यंदृग्बलं भवति। धनर्णदृग्बलयोरंतरंस्फुटंभवति। उदाहरणं। रवेरुपरिदृष्टयः। चंद्र०।१४।२। शनि०।५९।३९। शुदृष्टेश्चतुर्थांशोजातंधनंदृग्बलं ऋणंस्फुटं०।११।२४। एवंचंद्रादीनामपिज्ञेयं। अथगृहाणांषड्विधबलान्युक्त्वेदानींभावानांबलमाह। भावानामिति।

ग॰षड्बलैक्यचक्रं दृग्बलं								वक्ष्यमा
र	चं	मं	बु	गु	शु	श	ल	णंल
६	६	६	८	७	६	५	६	ग्रष
७।५	६।१	६।१	८।२	७।५	६।१	५।१	७।५	इलं
३०	५९	२८	३८	३८	३	५७	२५	ब

भावादीनांबलं भादीनांबलं मीशजंस्वस्वामिजंस्यात्। भावस्यमेषस्यस्वामीभौम

दृग्बलचक्रं॥ सदसद्दृष्ट्यधिकारे दृग्बलं						
र	चं	मं	बु	गु	शु	श
०	०	०	०	०	०	०
२१	२२	२	२१	८	२१	१२
३२	७	७	३०	१५	५०	२१
ऋ	ऋ	ध	ऋ	ऋ	ऋ	ध

भावषड्बलचक्रंमध्यमादृग्बलभावसंस्कारहीनं॥											
त	ध	स	सु	सु	रि	जा	मृ	ध	कु	आ	व्य
६	६	८	६	६	८	६	६	७	१५	५	७
७।५	६।१	८।२	७।५	७।५	८।२	६।१	६।१	७।१५	२१	५।१	७।१५
२८	२४	३८	४३	३०	३८	३	२८	२२	१८	५८	२२

स्तद्बलमेवजातंततनुभावबलं६।१०।४।२८। एवंधनादिभावानांस्वस्वामिबलानितानितेषामितिएकत्रलिख्यते। अथतन्वादिभावानांदृग्बलमाह। नृचतुष्पादेति। येभावानृचतुष्पादाख्यकीटांबुजाराशयःस्युःतेनक्रमेण। जायांद्व्याधखभोनिताःखलुततोदिग्वीर्यवत्तयुतंसद्बंधुयुग्यदृष्टिश्चरणोनंज्ञेऽपदृग्युक्स्वनः। यर्केद्विस्त्रिभयुक्सायनरविश्चेष्टाख्यकेंद्रेतयोर्गोकृष्टविधौबलेकुरुततः प्राग्दक्षवीर्यायते॥१२॥जायांद्व्याद्यखभोनिताः कार्याःततोदिग्वीर्यवत्बलंसाध्यं। एतदुक्तंभवति। येनरराशयोभावास्तेसप्तभावोनिताः

कार्याः। ततोदिग्वीर्यवत्बलंसाध्यं। तद्यथा। रसभात्पुष्टंचक्रतस्त्यजेत्। रसहृ
त्। अत्रभजनप्रकारस्तु दिग्बलोक्त एवानृचतुष्पादादिस्वरूपमुक्तंलघुजातके।
मेषवृषधन्विपरार्धसिंहश्चतुष्पादाममकरपूर्वभागश्च। कीटः कर्कटराशिः सरी
सृपो वृश्चिकः कथितः। मकरस्यपश्चिमार्धंकुंभोमीनश्चजलचराः ख्याताः। मिथु
नतुलाधरकन्याद्विपदाख्याधनुषिपूर्वभागश्च॥२। अत्रकुंभस्यजलचरमध्ये
गणनाकृतासापरमतेनदृश्यतेभाति। नृराशित्वेबहुसंमतेः। तथाहिबृहज्जातके।
मत्स्योघटीत्यादिनाराशिस्वरूपंवदताश्रीवराहमिहिरेणघटीतिकुंभस्वरूपमु
क्तं। घटीतिघटवान्पुरुषः कुंभराशिरित्येवभवतिहोरामकरंदेपि। सरित्कुंभो
मनुजश्चकुंभइत्युक्तमिति। नह्यनेनकुंभस्यजलचरत्वंसिध्यति। यथाकथंचि २९

त्तज्जलसंबंधेनजलचरत्वंचेत्तदासस्यदहनाप्लवगाश्वकन्येत्युक्तंकन्याराशिरपि
जलचरास्यात्। अतःकुंभोमनुजएव। अतएवश्रीवराहमिहिरार्याभिप्रायंजानता
तत्पुत्रेणपृथुयशसाषट्पंचाशिकायामुक्तं। तुलाथकन्यामिथुनंघटश्चनृराशयस्तेषु
शुभंवदंति। अस्योदाहरणं। अथात्रतनुभावः। २२। १२। ४६। अत्रमेषराशिरस्ति
सचतुष्पाद्राशिः चतुर्भावेन २। १२। २६। २। ऊनितः ९। ९। २६। ९। अयंषडधि
कः अतश्चक्रशुद्धः २। २०। १२३। ५१। ततः रसभक्तः लब्धंतनुदिग्बलं। २६। ४७
अनेनयुतंतनुबलं ६। २६। ५१। ५८। एवंसर्वेषांभावानांदिग्बलानिलिख्यंते॥
अथभावानांदृग्बलमाह। सदृष्ट्यंघ्रियुगग्रदृष्टिश्चरणोनमिति। भावंप्रतियाद
ृष्टयस्तत्सांमध्येशुभदृष्टेश्चतुर्थांशोस्वामिबलसहितदिग्बलेयुक्तः कार्यः। पाप
ग्रहदृष्टेश्चतुर्थांशोहीनः कार्यः। तत्सकलयाबुधदृष्ट्यावुधदृष्ट्यागुरुदृष्ट्या

भावानांदिग्बलं											
त	ध	स	सु	सु	रि	जा	मृ	ध	दू	आ	व्य
०	०	०	०	०	०	०	०	०	१	०	०
२६	७	३	२६	११	११	०	५१	५१	०	७	२२
७	५१	८	७	४	४	०	४	४	०	५१	८

भावानांदिग्बलानिस्वामिबलसहितानि											
त	ध	स	सु	सु	रि	जा	मृ	ध	दू	आ	व्य
६६	६६	८७	६६	८	६७	८	६७	७			
३६	५८	५६	८	५८	२५	११	१	६	११	५१	७
५१	५४	४६	२८	४८	४३	३	८	५३	५७	४८	५६
२८	१४	२८	५१	७०	२८	१४	२८	२१	१६	१८	२१

चयुतंकार्यं।तन्वादिद्वादशभावानांस्फुटंबलंभवति॥अस्योदाहरणं।तनुभावोपरिरव्यादीनांदृष्टयः।सूर्यः०।०।०।चंद्र०।४०।६।मंगळ०।०।०।बुध०।०।०।गुरु०।०।०।शुक्रः०।१।३०।शनि०।०।०।शुभदृष्टियोगः०।४१।३६।अस्यांघ्रि०।१०।२४।धनाख्यदृग्बलं।पापग्रहदृष्टियोगः।०।०।०।अस्यांघ्रि०।०।०।ऋणाख्यं।धनर्णयोरंतरेहृते शेषंधनंदृग्बलं०।११।२४।एतत्तनुभावबले ६।२६।५१।२८।युतं ६।४१।१५।२८

सकलयाबुधगुरुदृष्ट्या०।०।०।युतंजातंतनुभावबलंस्पष्टं ६।४७।१५।२८।सुतभावोपरिदृष्टयः सू०।१६।२७।चं०।०।०।मं०।५१।४।बु०।१७।१६।गु०।२२।१३।शु०।१७।१७।श०।२७।५०।शुभदृष्टियोगः०।२२।३०।अस्यांघ्रि०।८।७।धनाख्यं।पापग्रहदृष्टियोगः।१।५२।१७।अस्यांघ्रि०।२८।९।ऋणाख्यं।धनर्णयोरंतरेहृते शेषंऋणं०।२०।२।इदंबुधगुरुदृष्टियोगेन०।३९।२९।धनेनयुतं०।१९।३७।जातंसुतभावदृग्बलं।एतद्दिग्बलयुतंसुतभावबले ६।४८।३०।युतंजातंसुतभावबलंस्पष्टं।७।८।१५।३०।एवंसर्वेषामपिज्ञेयं॥५॥ ॥इतिश्रीविश्वनाथविरचितेकेशवपद्धतौबलाबलाध्यायोदाहरणं॥५॥अथरश्मीष्टकष्टसाधनायअर्केंद्वोर्योष्टकेंद्रबलेवाह।यर्केंदुरितिअस्यार्थः।सूर्येणहीनःइंदुःचंद्रस्यचेष्टकेंद्रंभवतिराशित्रयान्वितःसायनोरविःसूर्यस्यचेष्टकेंद्रःस्यात्।ततःकेंद्राभ्यांप्राग्वत्बलं

दग्धलंतन्वादिद्वादशभावानां												भावबलानिस्फुटानि											
त	ध	स	सु	सु	रि	जा	मृ	ध	क	आ	व	त	ध	स	सु	सु	रि	जा	मृ	ध	क	आ	व
०	०	०	०	०	०	०	०	०	०	०	०	६	५	८	६	७	६	७	७	६	७	७	८
११	११	११	११	१९	२२	१९	१८	३७	३१	२१	१९	८	३	४	८	८	८	७	१५	१४	२९	११	१९
२४	२	२४	२४	३०	३१	३८	३	५२	५८	३३	२९	१३	२	२१	१	१५	१	३०	५	१४	५	१९	२९
ध	ध	ध	ध	ध	ध	ध	ध	ध	ध	ध	ध	२	१	२८	२६	३०	२९	२	२१	२८	२१	२८	२१

स्यात्। तच्चभगणाच्युतंषडधिकंषट्हृतंचेष्टाबलमितिचेष्टाबलानयनरीत्याव
लंकुरुसाधय। किमर्थं। गोकृष्टेष्टविधोरश्मिमीष्टकृष्टसाधनार्थं। तेनबलेभ्यो
त्भोमादित्वीर्यायनभवतः चेष्टावीर्यंनभवतः।यद्दृक्स्यआयनबलंतद्देवचे
ष्टाबलं।अतोदृक्स्यायनबलंपूर्वमेवद्विगुणंहृतं।यच्चंद्रस्यपक्षबलंतद्देवचेष्टा
बलं।अतश्चंद्रस्यपक्षबलंद्विगुणंपूर्वमेवहृतं। अस्योदाहरणं। सूर्यः२।१२।५८

चंद्रः ५।१२।२५।३२ व्यर्कंदुः २।२८।२४। चंद्रस्यचेष्टार्कंद्रंअयनांशाः १७।४४।०।
त्रिभागयुतोजातंरवेश्चेष्टार्कंद्रं ६।२४।५८। चंद्रस्यचेष्टाबलं०।२९।२१।३१।रवे
श्चेष्टाबलं०।५९।१८।२०।अथरश्मिसाधनमाह॥येनेष्टाच्चबलेरसैद्विनिहते
सेकेनिजारश्मयश्चेष्टातुंगबलाहतेः पदमिहेष्टंस्याद्दृनोनैक्ययोः। घातान्मूलमि
ष्टंहिकृष्टमथनद्रूपंदृशायाः पृथगिष्टकृष्टगुणितेद्वेष्टकृष्टाक्षयं॥१
येचेष्टाच्चबलेति।अस्यार्थः॥येचेष्टाच्चबलेरसैर्विनिहतेगुणितेसेकेएक१युक्ते
निजाः स्वीयाः रश्मयोभवंति।उच्चबलादुच्चरश्मयः।चेष्टाबलाच्चेष्टारश्मयो
भवंति।पूर्वोक्तानिचेष्टोच्चबलानि। चेष्टाबलानिउच्चबलानि।अस्योदाहरणं।
रवेश्चेष्टाबलं०।५९।१८।२०।सैर्विनिहतं५।५५।५०।०।सेकंजातारवेश्चेष्टा
रश्मयः ६।५५।५०।०। रवेरुच्चबलं०।२८।३३।०।रसैर्गुणितं३।५१।१८।

यानि चेष्टाबलानि पूर्वानीतानि भौमादानां रश्मीष्टकुसाधनार्थं केवलमध्यानि चेष्टाबलानि नतोन्नतयनबलसंस्कृतानि

र	च	म	बु	गु	शु	श
०	०	०	०	०	०	०
५८	२९	२१	५६	३	६	२०
२०	३१	५९	१९	६	५३	३
३१	३	२२	८	५२	५	०

उच्चबलानि पूर्वमानीतानि

र	च	म	बु	गु	शु	श
०	०	०	०	०	०	०
३८	१६	३१	२९	५०	३०	७
३३	५३	५	१०	११	३५	३
०	१९	३	३५	७	५३	२

चेष्टारश्मयः

र	च	म	बु	गु	शु	श
६	३	२	६	७	७	७
५५	५६	२१	३९	७	७	०
५०	९	५८	५६	१८	७	२२

उच्चरश्मयः

र	च	म	बु	गु	शु	श
५	२	३	३	६	४	२
१८	८	२८	३	२	१२	२३

सैवंजातारवेरुच्चरश्मयः।४।५१।१८।०।एवंचंद्रादीनामपिज्ञेयं। अथेष्टकुसाधनं। चेष्टेति। चेष्टोच्चबलयोराहतेर्घातस्यपदंमूलंग्राह्यंयत्रहस्यइष्टंभवति बलोनेकुयोः। चेष्टोच्चबलाभ्यांपृथक्पृथक्कृतयोरेकयोर्घातान्मूलंयत्रहस्यकुष्टंभवति। अस्योदाहरणं ३२

रवेश्चेष्टाबलं०।५९।१८।२०उच्चबलं०।३८।३३।०।अनयोर्घात०।०।४१।४०।उच्चबलं०।२८।३३।०।रूपाद्विशोध्यशेषं०।२१।२७।०।शेषंहृयस्यघातः०।०।१५। एवंचंद्रादीनामपिज्ञेयं। चेष्टोच्चबलपदमितिघातहृयस्यमूलंग्राह्यं। मूलानयनप्रकारश्चलीलावत्यां। स्वल्पात्याद्विषमात्क्षतिंद्विगुणयेन्मूलंसमेतहृतेइति। मूलवर्गशेषंसैकमिति एतदाहरणं। रतेश्चेष्टोच्चबलयोर्घातः०।३८।६।इदंवारहृयंषष्ट्या

रव्यादीनांइष्टं

र	च	म	बु	गु	शु	श
०	०	०	०	०	०	०
७	२२	१६	४०	२२	१४	६
२८	१४	१५	५२	८	३	३०

रव्यादीनांकुष्टं

र	च	म	बु	गु	शु	श
०	०	०	०	०	०	०
३	३६	४३	१०	२२	३९	२८
५२	२६	३९	५	२४	३५	४

बलोनेकुयोर्घातः

र	च	म	बु	गु	शु	श
०	०	०	०	०	०	०
०	२२	३०	५	८	२६	३८
१५	२	२०	४५	२२	७	२०

चेष्टोच्चबलयोर्घातमूलं चेष्टोच्चबलोनेकुयोर्घातमूलं

वेष्टाङ्कबलयो र्घाताः						
र	व	म	बु	गु	शु	श
० ३८	० २८	० २८	० ५१	० २ ०	० २५	० ३

सवर्णितं २२८६।उत्क्रवन्मूलं ४७।४८।षष्टिभ
क्तंघातस्यसूक्ष्ममूलं ०।४७।४८।इदंरवेरिष्ट॥
बलोनैक्यो र्घातिः ७०।१५।वारद्वयंषष्ट्यासवर्णि
तं १५।अस्यमूलं ३।५२।षष्टिभक्तंतस्यसूक्ष्ममू
लं ०।३।५२।इदंरवेः कृष्टं। एवंचंद्रादीनामपि।अथइष्टकृष्टप्रयोजनं।तद्रूपमि
ति।इष्टकृष्टानुरूपंग्रहस्यदशाफलंज्ञेयं।तद्यथा॥इष्टाधिक्येग्रहस्यदशाफलंशु
भंज्ञेयं।कृष्टाधिक्येग्रहस्यदशाफलंअशुभंज्ञेयं॥बलसाम्येदशायाःफलंसम
ज्ञेयं।वीर्येदृगिति।ग्रहस्यवीर्यंषड्बलंइष्टेनकृष्टेनचपृथक्पृथग्गुणितंका
र्यंतत्इष्टकृष्टाङ्कयबलंस्यात्।इष्टबलंकृष्टबलंवज्ञेयं।अस्यप्रयोजनं॥ ३३
ग्रहस्यशुभफलंशुभबलवशात्ज्ञेयं।अशुभफलंअशुभफलवशात्ज्ञेयं

अन्यत्प्रयोजनंच॥सप्तवर्गजशुभाशुभसाधनेशुभघातमूलेनशुभंगुण्यं।अ
शुभमूलघातेनअशुभंगुण्यं।दृगिति।दृशः ग्रहंप्रतियः दृशः आनीतास्ता
स्तस्यदृश्यस्यग्रहस्यइष्टेनकृष्टेनपृथक्पृथग्गुण्यास्ताइष्टकृष्टाङ्कया दृशो
भवंति।एतत्प्रयोजनं।दृष्टेःशुभफलंचेत्तर्हिइष्टदृष्टिवशाद्योज्यं।दृष्टेरशुभं
फलंचेत्तर्हिकृष्टदृष्टिवशाद्योज्यं।अथसप्तवर्गजशुभाशुभबलमाह॥
स्वोच्चेरूपंत्रिकोणेचरणविरहितंस्वर्क्षगेर्धंत्रयोष्टांशाश्चाधीष्टर्क्षइष्टर्क्ष
युजिचरणः स्यात्समर्क्षेष्टमांशः।भूपांशोवीर्यगेर्ध्यरिभयुजिरदांशश्च
नीचेस्वमांशाद्दृष्टंगहेतद्दनैक्यसदथदलंषड्घ्नंकार्यतदैक्ये॥१४॥स्वो
च्चेति।ग्रहेस्वोच्चेसतिरूपं१बलं।त्रिकोणेस्वमूलत्रिकोणेचरणरहितंबलं
०।२८।०।स्वर्क्षगेस्वराशौअर्धं।०।३०।अधीष्टर्क्षेअधिमित्रमित्रयो

इष्टगुणितदृष्टिचक्रं

०	सू	चं	मं	बु	गु	शु	श
सू	००	२५	००	००	००	००	००
चं	००	००	००	००	००	००	००
मं	००	००	००	००	००	००	००
बु	००	००	००	००	००	००	००
गु	००	००	००	००	००	००	००
शु	००	००	००	००	००	००	००
श	००	००	००	००	००	००	००

०	सू	चं	मं	बु	गु	शु	श
सू	००	२५	००	००	००	००	००
चं	००	००	००	००	००	००	००
मं	००	००	००	००	००	००	००
बु	००	००	००	००	००	००	००
गु	००	००	००	००	००	००	००
शु	००	००	००	००	००	००	००
श	००	००	००	००	००	००	००

DE GRUYTER OPEN

षड्बलानि						
र	चं	मं	बु	गु	शु	श
६०	६०	६०	६०	७०	६०	५०
३०	५३	५१	३८	४८	३०	३०
३०	५६	५८	५८	५१	३०	१८

ग्रहाणांइष्टबलानि						
र	च	म	बु	गु	शु	श
५०	३०	१०	५०	१०	३०	३०
५६	५१	५३	५६	५८	४८	३०

ग्रहाणांकष्टबलानि						
र	च	म	बु	गु	शु	श
०	०	०	१०	२०	२०	१०
२५	३०	३३	३०	३०	२८	८०
३०	१७	३०	४०	४०	३५	५८

षमांशाः०।२२।३०। इष्टर्क्षयुजिमित्रराशौचरणः०।१५।०। समर्क्षेसमराशौअ
षमांशः०।७।३०। वैरिगेहेभूपांशः षोडशांशः०।३।४५। अध्यारिभयुजिरुछाने
वाराब्गृहेरदांशः द्वात्रिंशद्भागः०।१।५२।३०। नीचेखंशून्यं०। यत्रोच्चंनीचंवासं
भवतितत्रान्यत्मित्रादिजंनग्राह्यं॥ एतत्वर्गशवशाग्रहेइष्टंज्ञेयं॥तद्यथा॥ गृ
हस्वामी यस्मिन्स्वोच्चादिगृहेस्तितत्रोक्तंशुभंगृहेज्ञेयं। तद्दृनैकंतेनशुभेनऊनं

एवं रूपंगृहेऽसत्अशुभंज्ञेयं।अथदलंषट्सुहोरादिषट्वर्गेषुदलमितिगृ
हवदागन्तंशुभाशुभयोर्दलंज्ञेयं॥तद्यथा॥होरादिषुवर्गस्वामीयस्मिन्स्वोच्चा
दिभेस्थितदुक्तंशुभंग्राह्यं।तत्रूपछो
अधितंअशुभंस्यात्।तयोःशुभाशुभ
योर्दलेहोरादिवर्गेषुग्राह्ये।तदेकैकवर्ग
र्यं।तद्यथा।एवंसप्तवर्गोत्पन्नानांशु

स्वोच्चादिषुक्रमेणबलानि

मूर्ति	सू	च	मं	बु	गु	शु	शनीस्व
उ	मित्र	स्व	अ	मि	स	श	अशनीस्व
	०	०	०	०	०	०	०
	०	५८	३	२२	१५	७	३	५३	०
	७	०	०	३०	०	३०	८८	३०	०

भाशुभानांपृथक्पृथक्ऐक्यंकार्यं॥ईशादित्यत्रकेचिदेवंव्याकुर्वतेक्रियमा
णबालस्यगृहादिसप्तवर्गस्वामीयादृशस्तादृशंतस्यस्वर्क्षेधिसमभेष्टम
इत्यादिउक्तरीत्याबलंग्राह्यमिति।तदसत्।यतोआचार्यैःश्रीपतिश्रीधर

३५

नीलकंठादिभिःस्वस्वपद्धतौसप्तवर्गबलेइष्टेचनिजपतेर्वशात्सप्तवर्गपतिवशा
त्इत्येवोक्तं।तेनसप्तवर्गाधीश्वरःस्वर्क्षादिषुयत्रतिष्ठतितत्रत्यंफलंग्राह्यं॥आ
आश्रयगुणकेचवर्गस्थमेवफलंग्राह्यमित्यत्रमाचार्यैः।इत्यनयोर्भेदःप्रगटएव॥
येअभेदंप्रतिपादयंतितेषामाशयस्तुतएवजानंतु।पदार्थस्तूक्तप्रकारएव॥तद्य
थाहृतेशुभाशुभयोर्न्यासः॥अथकिंकर्तव्यमाह॥पंक्त्योःसप्तसुकोष्ठयोःप्रथमयो
रिष्टासदैक्येहृतास्तेस्वाप्येभदलादिषट्सुचतदर्धवर्गपानांपृथक्॥हृत्वोत्पा
सदसद्धतीनिजनिजेतन्निघ्नइष्टशुभेवर्गैःतल्लवगोजसोःसदसतोर्घातात्सद्
घ्नेस्फुटे॥९५॥पंक्त्योरिति॥पंक्त्योःशुभाशुभपंक्त्योःसप्तसुकोष्ठयोःयइष्टासदै
क्येशुभाशुभैक्येतेकृहकोष्ठेस्थाप्ये।ततोभदलादिषट्सुहोरादिषट्कोष्ठकेषु
तदर्धंगृहीयशुभाशुभार्धेस्थाप्ये।अस्योदाहरणं।रवेःशुभैक्यं ७।२।४८।

हतार्थचतुर्भक्तयलब्धंतशुभानांयोगः

र	च	मं	बु	गु	शु	श
१	२	०	१	१	१	०
२	०	३९	२	८	७	५
५८	५६	२२	५८	२५	३०	५०

अशुभानांयोगः

र	चं	मं	बु	गु	शु	श
३	२	३	२	२	२	३
५	५९	२०	५	५१	५३	२२
१२	८	३८	१२	३५	३०	२३

शुभपंक्तिः

०	सू	चं	मं	बु	गु	शु	श
गृ	०३०	०३०	०३०	०३०	०३०	०३०	०३०
हो	०२२	०२५	०२२	०२२	०२२	०२५	०२२
द्रे	०३५	०३५	०३५	०३५	०२०	०२५	०२२
स	०२०	०३५	०३०	०२३	०२२	०३५	०२५
न	०३५	०३०	०२५	०३५	०२५	०३५	०२२
क्षी	०३०	०३५	०३५	०३०	०२०	०३०	०२०
त्रि	०२६	०२६	०३५	०२६	०३५	०३५	०२६

३६

शुभपंक्तिः

०	र	च	मं	बु	गु	शु	श
गृ	०३०	०३०	०२३	०३०	०३०	०३०	०२१
हो	०२१	०२८	०२१	०२१	०२१	०२५	०२१
द्रे	०२५	०२५	०२५	०२५	०२०	०२५	०२१
स	०२०	०२५	०२३	०२०	०२१	०२८	०२०
न	०२५	०२३	०२१	०२५	०२१	०२५	०२१
क्षी	०२०	०२५	०२५	०२०	०२०	०२०	०२०
त्रि	०२६	०२६	०२५	०२६	०२५	०२५	०२६

शुभपंक्तिहतांशः

०	र	च	मं	बु	गु	शु	श
गृ	०२५	०२५	०२१	०२५	०३०	०२५	०२५
हो	०३०	०३०	०२५	०२५	०२१	०२५	०२५
द्रे	०३०	०३०	०२५	०३०	०२५	०२५	०२५
स	०३०	०३०	०२५	०२५	०२५	०२५	०२५
न	०३०	०३०	०२५	०२५	०२५	०२५	०२५
क्षी	०३०	०३०	०२५	०३०	०२५	०२५	०२५
त्रि	०३०	०३०	०२५	०३०	०२५	०२५	०२५



शुभपंक्तिहृताप्तः

०	र	वं	मं	बु	गु	शु	श
गृ							
हो							
द्रे							
स							
न							
द्वा							
त्रिं							

हृताप्ताशुभपंक्तिः

०	र	वं	मं	बु	गु	शु	श
गृ							
हो							
द्रे							
स							
न							
द्वा							
त्रिं							

चतुर्भक्तं ०।१५।४२। गृहक्षोष्ठकेरुछाप्यं। अस्यार्धं ०।७।५१। होरादिषट्सुक्षोष्ठ
केषुरुछाप्यं। एवंरवेरशुभैक्यं २।५७।१२। चतुर्भक्तं ०।४।१८। अशुभपंक्तौगृहक्षो
ष्ठकेधार्यं। अस्यार्धं ०।२२।९। अशुभपंक्तौहोरादिषट्क्षोष्ठकेषुरुछाप्यं। एवंबं
द्रादीनामपिज्ञेयं। अथशुभाशुभयोःस्फुटीकरणं॥ वर्गपाएगामिति॥ वर्गपानांस
प्तवर्गस्वामिनांउक्त्वा हृत्वायन्निजनिजेसदसद्यतीतन्निघ्नइष्टाशुभे। तद्यथा। गृह
होरादिसप्तवर्गस्वामिनोपृथक्पृथक्उक्तप्रकारेणस्वोच्चेरूपमित्यादिरीत्यारुछाप्ये
तशुभाशुभानांहृतौयौस्वीयस्वीयशुभाशुभयोगौतांस्वीयस्वीयांस्वस्ववर्ग
रुछशुभाशुभंगुणयेत्। अस्योदाहरणं। यथाऽरविर्मिथुनेस्तिअतोगृहेशोबुधःत
स्यशुभयुतिः१।२।४८। पूर्वरुछापितरवेर्गृहशुभं ०।१५।४२। शुभयुत्यागुणितं।
०।१६।२५। गृहरुछानेलिखेत्। एवंगृहेश्वरस्यबुधस्यअशुभयोगः२।५७।१२।

पूर्वस्थापितरवेर्गृहेऽशुभं ८१६।१८।अत्रशुभयुत्यागुणितं २।१०।५७।अ
शुभपंक्तौ गृहस्थानेलिखेत्।एवंहोरादिकानामपि॥अथगुणितशुभाशुभा
नां न्यासः॥ छ॥ अथशुभाशुभयोः पुनः स्फुटीकरणंवर्गेष्टतत्स्वखगोजसोः
सदृसतोर्घातात्पदघ्नेस्फुटइति। एतदुक्तं भवति। गृहादिवर्गेषुस्थितोयोग्रहः
सतत्स्वखगः सः गृहादिवर्गेयत्रास्तितद्वर्गस्वामी वर्गेष्टवर्गेश्वरः तयोःशुभा
शुभयोर्बलयोर्घातात्पदांतेनस्ववर्गशुभाशुभंगुणनीयं। वर्गेश्वरतत्स्व खगयोः
शुभबलघातमूलेनस्ववर्गस्थंशुभंगुणयेत्।एवंतयोः ~~शुभम्~~ अशुभ बलं.
घातमूलेनअशुभंगुणयेत्। एवंतत्स्व ग्रहहोरेश्वरयोरुक्तमूलेनहोरास्तंगुण्य
एवमन्यवर्गस्थंच॥ एवंसप्तवर्गजंशुभाशुभंच स्फुटंभवति। एतद्दर्शनंत्य
क्तस्यगृहादीनाशुभाशुभफलयोर्ज्ञं।अस्योदाहरणं।रविर्मिथुनस्तीतिगृहे

शोबुधःसहएववर्गेश्वरस्तस्यइष्टघ्नषट्बलं ५।२६।५६। रवेःशुभसाधनेर
विस्तत्तुखगस्तस्यइष्टघ्नबलं ५।१६।५१।अनयोर्घातः २८।३१।६।अयंसूक्ष्म
मूलार्थवारद्वयंषष्ट्यासवर्जितः १०६७।४६।अस्यपदं ३२६४३। षष्ट्याभक्तं
जातंसूक्ष्ममूलं ५।२६।४३।अनेनपूर्ववर्गेशाशुभयोगगुणितगृहबलं ०।१६।२५
गुणितंजातंस्फुटंगृहेशुभबलं १।२९।२३।एवंहोरादिबलान्यपिस्फुटानिका
र्याणि। एवमशुभबलान्यपिसाध्यानि। तथाकृतेशुभाशुभयोःस्फुटयोर्न्यासः
॥८१॥ ॥इतिश्रीदिवाकरदैवज्ञात्मजविश्वनाथदैवज्ञविरचितेकेशवपद्धत्यु
दाहरणेइष्टकष्टसप्तवर्गजशुभाशुभबलसाधनाध्यायःसंपूर्णः॥ ८॥ ॥
अथआयुर्ज्ञानंविनायहाणांदशाविभागोनज्ञायतेजंतोःकियन्मितंजीवितमि

जातंस्फुटंशुभं							
०	र	चं	मं	बु	गु	शु	श
गृ							
हो							
द्रे							
स							
न							
क्षा							
त्रि							

जातंस्फुटंअशुभं।							
०	र	चं	मं	बु	गु	शु	श
गृ							
हो							
द्रे							
स							
न							
क्षा							
त्रि							

शुभयोगः स्फुटः						
र	च	मं	बु	गु	शु	श
४	३	१	४	३	३	३
२३	२६	०	२१	५३	४०	५३
२८	२७	१२	४३	१३	५३	११

अशुभयोगः स्फुटः						
र	च	मं	बु	गु	शु	श
८	३३	४०	१५	५	३४	३७
५०	५३	४८	५५	४	२२	३४
११	३१	४१	०९	२५	२३	३४

तिवनज्ञायते। ग्रहाणांयल्किंचित्सर्वफलंदशास्वेवभवति। इतिप्रधानत्वादायुर्दा
याध्यायआरभ्यते। सचायुर्दायोद्विविधः। ग्रहयोगजोगणितागतश्च। ग्रहयोग
जस्त्रिविधः। नियतायुर्दायः१ परमायुर्दायः२ अमितायुर्दायश्चेति॥३॥ तत्रा
दौयोगजायुर्दायभेदस्यामितायुर्दायस्यैकमुदाहरणं॥ कर्कीद्विज्ययुतोदयेबु
धसितौकेंद्रेत्यरीशेतरैरायुर्विध्यमितंह्योगजमिवान्यत्रोच्यतेत्रोन्मिते॥ यत्यां

श्वेत्किरणाः सरूपत्किरणांघ्रिश्चेद्यो र्ध्वाविभू। गोर्धंचेष्टिकृतुंगसंभवगुणो
तद्धातमूलंस्फुटः॥६॥ कर्कीद्विति॥ इंदुश्चईज्यश्चइंद्वीज्यौ। कर्किणोचतोइंद्वी
ज्योश्चकर्कीद्वीज्यौ ताभ्यांयुतश्चासौउदयश्चतस्मिन्कर्कलग्नेचंद्रेज्याइत्यर्थः॥
बुधसितौकेंद्रेचभवतः। त्रयश्चअरिश्चईशश्चत्र्यरीशाः त्र्यरीशौषडितराभ्यरी
शेतराः तैः। त्रिसंख्यायाः स्थानंत्रयः। अरिशब्देनषष्ठं। ईशशब्देनएकादश।
एतेषुपापग्रहाः रविभौमसंदास्तैः एवंसप्तग्रहाणांयोगेअमितंअगणितंआ
युर्विद्धिजानीहियोगजमिवअन्यत्रजातकशास्त्रेविद्धि॥ तद्यथा॥ शुक्रायुर्दा
यं। होरेश्वरेकर्कसंस्थेजन्मेशेवापिसौम्यदृक्॥ हीनकेंद्रगतैःपापैर्जीवस्यविं
शतेर्मृतिर्भवतीत्यादिनानियतायुर्दायउक्तः। अनिमेषपरमेत्यादिनाबृह
ज्जातकेपरमायुर्दायउक्तः। तत्रअस्याजातकपद्धतौउन्मितंगणितंआयुरु

च्यते। तच्चतुर्विधं। पिंडजं। १ नैसर्गिकं २ जीवसामेदितं। ३ अंशायुश्चे
ति। ४। तत्रअंशायुः कर्मयोग्यगुणकाधीनंसत्स्फुटगुणकाश्रयगुणकयो
र्वधमूलं। स्फुटगुणकस्तूच्चचेष्टगुणकयोर्वधमूलं॥ तत्रादौउच्चचेष्टगु
णौस्फुटगुणंचाह। त्र्यत्याइति। चेत्किरणैः रसमयैः त्र्यत्याः रूपत्रयन्यू
नास्तदासरूपकिरणांघ्रिः रूपयुक्किरणानामंघ्रिश्चतुर्थांशोगुणःस्यो
त्। चेत्त्रयोर्ध्वीरूपत्रयाधिकाः किरणास्तर्हिविभूतोर्धंएकरहितकिरणानां
अर्धंगुणः स्यात्॥ एवंचेष्टकुतुंगसंभवगुणकोभवतः। चेष्टारश्मिश्चेष्टगु
णकः। उच्चरश्मिभ्यःउच्चगुणकोज्ञेयः। उदाहरणं। रवेश्चेष्टारश्मयः ६।५५।
५७। त्रयोर्ध्वाः। विभूतोर्धंमिस्फुटत्वादेकरहिताः ५।५५।५७। एषामर्धं २। ४१
५७।५५। जातोरवेश्चेष्टारश्मिगुणकः। रवेरुच्चरश्मयः ४।५१।१८। रूपत्रे

याधिकाः एकेनरहिताः ५।५१।१८। अर्धं १।५५।३९। जातोरवेरुच्चगुणकः
चंद्रस्योच्चरश्मयः २।४१।८। एतेत्र्यत्याः अतोरूपयुक्ताः २।४।८। एषामघ्रि
र्जातोचंद्रस्योच्चगुणकः एवमन्येषांन्यासः॥ अथस्फुटगुणकसाधनं। तस्मा
तइ.. तयोश्चेष्टोच्चगुणकयोर्घातस्यमूलं स्फुटगुणकः स्यात्॥ उदाहरणं॥ रवे

चेष्टगुणकाः							उच्चगुणकाः							स्फुटगुणकाः						
र	च	म	बु	गु	शु	श	र	च	म	बु	गु	शु	श	र	च	म	बु	गु	शु	श
२	२	०	२	३	०	०	२	५	६	२	२	२	०	३	२	५	६	२	२	०
५	८	०	५	१	४	११	३	४	२	३	३	३	३	२	६	२	३	३	६	३

चेष्टगुणकः २।५८।५५। उच्चगुणकः १।५५।३९। अनयोर्घातः २।४।५६।
अयंसूक्ष्ममूलार्थंबाहुर्यथादर्शितं २।५८।६। अस्यमूलं १।४।२६।

षष्ठिभक्तंजातोरवेःस्फुटगुणकः २।२३।२६। एवंचंद्रादीनामपिस्फुटगुण
काः। अथाश्रयगुणक्रमाह॥ यःस्वाधीपसुहृत्समार्यधिरिपोर्वर्गेधृतिश्चेष्टिला
विघांकेषुगुणागृहेद्विगुणितायोगःक्रमाद्धरेत्॥तद्भेषट्वसुगोशुभरति
जिनैःषड्घ्नश्चवर्गोत्तमस्वांशत्र्यंशगतेसदारसगुणे२६स्यादाश्रयाख्योगुणः॥
९७॥ यःस्वेत्यादि। स्वादीनांवर्गक्रमात्धृतिश्चेत्यादिषडंकाज्ञेयाः। तद्यथा। स्ववर्गे
धृतिः अष्टादश १८। अधीशस्यवर्गइष्टिगः पंचदश। १५। सुहृद्वर्गेविश्वेः १३
समवर्गेअंकाः ९ नवअरिवर्गेइषवः पंच ५। अधिरिपुवर्गेगुणाःत्रयः। ३।
एवमेतेषांहोरादिवर्गोक्तेअंकाःस्युः। गृहस्थानेयोअंकउक्तवर्गउक्तसंख्य
गुणोग्राह्यःस्थाप्यः। होरादिवर्गेयथास्थितएवस्थाप्यः। तेषांयोगस्तयोर्गस्वा ४२
दीनांषण्णांमध्येतद्भेतस्यग्रहस्यभंगृहेसतिक्रमादेतैःषड्भिरंकैर्वध्यमाणैः

षड्घ्नैर्हरेत्। तद्यथा। स्वस्यगृहेषड्भिः ६षड्घ्नैः ३६अधीशगृहेवसुभिः षड्
घ्नैः ४८। सुहृद्गृहेनवभिः षड्घ्नैः ५४। शुभगृहेअंशुभद्भिः द्वादशभिःषड्घ्नैः
७२। अरिगृहेधृतिभिः षड्घ्नैः १०८ अधिरिपुगृहेजिनैः चतुर्विंशतिभिःषड्
घ्नैः १४४। क्रमेणहरेदित्यर्थः। वर्गोत्तमोस्वांशेस्वनवमांशे। स्वत्र्यंशे। स्वद्रेक्का
णेगृहेसतिसदारसगुणैः २६। षड्भिंशाद्भिरेवहरेत्। नस्वादिगृहगतहरेणेत्य
र्थः। एवंहृतेलब्धमाश्रयाख्योगुणःस्यात्। अस्योदाहरणं। अत्रराकिराशुगृहे
स्तिअतः पंचप्राप्ताः। गृहेद्विगुणिताइतिउक्तत्वात्। गृहेदशजाताः। होरातु
स्वस्येववर्तते अतोहोरायाः अष्टादश १८। द्रेक्काणः अधिशत्रोरास्तिअतोत्र
द्रेक्काणेत्रयः ३। सप्तमांशः शत्रोरस्ति। अतः सप्तमांशेपंच ५। नवमांशस्त्रिं
शांशोममस्यवर्तेतेअतः नवमांशत्रिंशांशयोर्नव ९ नव ९ द्वादशांशः अ

स्यअतः द्वादशांशेपंचदश १५। एवंजाताः रवेः सप्तसु वर्गेषु अंकाः अथैषांयो गोभाज्यः ६९। अथभाजकः रविर्वर्गोत्तमादित्रितयेनास्ति। शत्रुगृहेस्तिअतोभा जकः १०८। अनेनभक्ते भाज्येलब्धो रवेराश्रयगुणकः ०।३८।२०। एवमुत्तरी त्याजाता भाज्यांकाभाजकांताआश्रयगुणकाश्चलिख्यंते॥१७॥ अथाश्रयगु णकेविशेषसंस्कारंकर्मयोग्यगुणकंचायुर्भागांश्चाह॥ चेद्वर्गोत्तमपूर्वगोध्

भाज्यभाजकयोर्यथायोग्ययोर्न्यासः

स्व	अमि	मित्र	सम	शत्रु	अंश	वर्गाः	र	चं	मं	बु	गु	शु	श	भाज्याः सप्तवर्गनियोगः
१८	१५	१३	९	५	३	भाज्यः	६९	८९	७७	७३	६१	१०४	७६	भाज्याः
३६	२८	५४	७२	१०८	१३५	भाजकः	१०८	२८	५४	३६	३६	३६	५२	भाजकाः सप्तवर्गयोगानांयथायोग्य

६३

रव्यादीनां गृहादिसप्तवर्गांकाः

०	र	चं	मं	बु	गु	शु	श
गृ	१०	३०	२६	३६	६	१८	१८
हो	१८	१८	१५	९	९	९	९
द्रे	३	५	१३	९	३	१५	९
स	५	१३	१८	१८	९	१३	३
न	९	५	९	१३	१८	१८	९
द्वा	१५	५	१३	१३	३	१३	५
त्रि	९	१३	१३	५	१३	१८	१३

आश्रयगुणकाः मध्यमाः

र	च	मं	बु	गु	शु	श
०	२	२	३	२	३	२
३८	५१	५८	५१	४१	५३	३
२०	१५	५३	४०	४०	२०	२०

रिसुहृद्गृहांकाश्चिषड्लब्धोतोयुगरीषभे
क्षिनवकास्यात्स्वसमेबलः। कार्यस्त्वाश्रयकः
सनत्स्फुटहतेर्मूलंसयोग्योगुणः रवेरानंचतनो
र्लवाः स्वयुगहृच्छेषाद्हांशायुषः॥१८॥ चेदिति
वर्गोत्तमपूर्वगः वर्गोत्तमस्वनवमांशस्वद्रेष्का

णगतो ग्रहश्चेदधिसुहृद्गृहेअधिशत्रुगृहेअधिमित्रगृहेभवतितदाद्विगुणिता
त्। गृहांकात्त्रिषड्दशलब्धासपूर्वानीतआश्रयगुणकः ऊनयुक् कार्यः।अ
धिशत्रुभेऊनः।अधिमित्रभेयुक्। वर्गोत्तमादिषुस्थितःसन्।अरीष्टभेशत्रुगृ
हेमित्रगृहेसतिगृहांकात्द्विगुणितात्।अधिनवकाद्याच्चपुनर्नवतिभि९४
भक्तात्लब्धाऊनयुक्कार्यः।शत्रुभेऊनः।मित्रभेयुक्।आश्रयगुणकः कार्यः
स्वेस्वेगृहे।समेसमगृहेसतिकेवलः यथास्थितएव। एवंआश्रयगुणकाः का
र्यः।अस्योदाहरणं।अत्रवर्गोत्तमादित्रितयमध्येगुरुः स्वनवमांशेस्तिअतोगु
रोराश्रयगुणकस्यसंस्कारः कार्यः।सयथा।गुरुरधिशत्रुगृहेस्ति।अतः गुरोर्गृ
हांकः २। द्विगुणितः ६। त्रिषड्याभक्तलब्धिः ०।५।४२। गुरोराश्रयगुणकः ४४
२।४१।४०।अधिशत्रुगृहेस्थितत्वात्लब्धऊनोजातः गुरोराश्रयगुण कः

१।३५।५८। शुक्रोयद्यपिस्वनवांशेस्तिअतः संस्कारेयुक्तः। तथापिस्वभेसभे
पिवासंस्कारोनैवविद्यतइतिशुक्रस्यआश्रयगुणकोयथास्थितएवआश्रयगुण
कः २।५३।२०। अन्येषांतुसंस्कारनिमित्ताभावात्यथास्थिता एवाश्रयगुणकाः।

रव्यादीनांसंस्कारयुक्ताःआश्रयगुणकाः।।

र	च	मं	बु	गु	शु	श
३८	५१	५८	५१	३५	५३	३०
३०	२५	५३	५०	५८	३०	३०

कर्मयोगगुणकाः

र	च	मं	बु	गु	शु	श
२१	२८	३०	३५	२३	२३	०५३
६	६	५१	६	२८	३०	२२

२।५३।२०। अन्येषांतु संस्कारनिमित्ताभावात् यथास्थिता एवाश्रयगुणकाः। एवंजातारव्यादीनामाश्रयगुणकालिख्यंते। अथकर्मयोगगुणकः। सतत्स्फुटहतेर्मूलमिति। आश्रयगुणकस्यः प्रागानीतस्फुटगुणकस्यचआहतेर्गुणनस्यमूलंसयोग्योगुणकः कर्मयोग्यगुणकः स्यात्। उक्तानांगुणकानांमध्येआ

युःकर्मणिअयमेवोपयुज्यतइत्यर्थः।उदाहरणं।रवेराश्रयगुणकः०१३८।२०।
रवेःप्रागानीतस्युटगुणः२।२३।२६।अनयोर्घातः१।२१।३८।अस्यमूलंजातः
कर्मयोग्यगुणकः१।१४।९।एवंचंद्रादीनामपिज्ञेयं।अथआयुरंशासाधनं।रवे
रानामिति।रव्यादीनांसप्तग्रहाणांलग्नस्यचलवाःअंशाःकार्याः।खयुगहृच्छे
षाःचत्वारिंशद्धृताःशेषाःइहआयुरंशाःभवंति।अस्योदाहरणं।रविः
२।१४।२०।५८।राशयस्त्रिंशद्गुणिताः६०।अंशैर्युताःजातारवेरंशाः७४
चत्वारिंशद्धृताःशेष२४रवेरायुरंशाः।एवंचंद्रादीनामपिज्ञातआयुरं
शाल्लिख्यंते।अथचक्रार्धहानिमाह।षड्भाल्येसतिखेचरोतउदयेत्यांशाहृतैः
खाग्निभि२०स्त्वेकाल्येस्यचखाग्निभाजितलवैःसोम्योमितेत्वर्धितैः।ऊना
भूर्गुणएकभेद्विबदुषुत्वेकस्यवक्रौजसःकार्यस्तद्गुणिताःखदायजलवाश्चे

GOVERNMENT OF INDIA

रव्यादीनांआयुरंशाः							
र	चं	मं	बु	गु	शु	श	लग्न
३२	३	२१	३३	२८	५	२३	२२
२०	२५	२५	३१	३५	१३	३८	३३
२८	३२	२८	२९	३५	५५	५३	५५

र्धहानिर्भवेत्।।२९।।षड्भाल्येति।खे
चरोनेउदयेलग्नेषड्भाल्येसतिद्वयंहानि
र्नान्यथा।अस्यांशाहृतैःखाग्निभिः२०
यत्लब्धंतद्रूपाछोध्यंगुणःस्यात्।तद्य
था।लग्नाद्ग्रहःशोध्यः।शेषंषड्राशिभ्यःहीनंभवतितदातस्यांशाःकार्याः।
तेरंशैरुद्धृतैःखाग्निभिः।२०।यल्लब्धंतद्रूपाछोध्यंगुणःस्यात्।एकाल्येस
तिअस्यचखाग्निभाजितलवैः।तद्यथा।लग्नात्ग्रहः शोध्यः शेषंएका
ल्यंचेत्तर्हितस्यअंशाःत्रिंशद्भिः२०।भाज्याःयल्लब्धंतद्रूपाछोध्यंगुणःस्यात्।
सोम्योनितेत्वर्धितैः।शुभग्रहेरूनितेउदयेसतिउक्तवत्तयल्लब्धंतस्यार्द्धं
तद्रूपाछोध्यसगुणःस्यात्।एकभेद्विबदुषु।एकराशौद्वौग्रहेबदुषुवात

न्मध्ये बक्रोजसःअधिकषड्बलेक्यस्यएकग्रहस्येवगुणःकार्यः नान्यस्य।इ
दंसर्वेषांमतं।अस्योदाहरणं।अत्रलग्नं ०।२२।१ ।४६। रविणाऊनंजातं
१०।७।५१।४८।अत्रखेचरोनउदयस्यषड्भ्योधिकत्वान्नेवहानिसंभ
वः।अत्रकल्पितलग्नं २।४।५४।२८। बुधः ८।८।२४।१६।अनेनऊनितंलि
ग्नं ५।२६। ३२।१२।अस्यअंशादिकैः १।७।६। २२।१२।भजेत्खाग्नयः
३०। सवर्णितौभाज्यंभाजकौभाजकः ६३५५३२।भाज्यः १०८०००।भाज्
केनहृतेभाज्येलब्धं ०।१७।११।अयंशुभग्रहोस्तिअतोर्ध ०।५।५। रूपाछोध्यं
२५४५५।गुणकः।एवंसर्वत्रज्ञेयं।अस्मिन्नुदाहरणेरविचंद्रौमबुधगुरु
शुक्राणांचक्रपातार्धहानिसंभवोनास्ति।शनेःसंभवोस्तिससाध्यते। लग्नं ४६
०।२२।१२। ४६। शनिना ०।१२। ३८।५२।ऊनंजातं ०।८।२३।५४।अंशाः

८।२३।५४। त्रिंशाद्धलब्धं ०।१७।७। रूपाछुद्धानेयायुरंशानागुणकः
०।४२।५३। इतरेषांचक्रपातार्धसाधितगुणकस्यतुल्यमाह। तद्गुणितेति।
एवंयःग्रहस्यगुणकउच्यते।तेनगुणकेनघ्नाःगुणितानिजायुरंशा
कलाः कार्याः।एकत्रगुणकेनैवचक्रार्धहानिरुक्ता।अस्योदाहरणं।। शा
नेरायुरंशाः १२।३८।५२। चक्रपातार्धहानिगुणकेन ०।४२।५३। गुणि
ताः ९।५९।१५।जाताहानिसंस्कृताःशनेरंशाः ९।५९।१५।सर्वेषांदा
यांशोत्थलवाः॥१९॥अथवर्षायुरंशायुर्दायानयनमाह॥दायांशोत्थ
कलाः स्वयोग्यगुणकघ्नाःखाभ्रनेत्रोद्धताअंशायुघ्नदोसमादितुतनो
र्दायांशकास्याहताः।दिग्भक्ताहिसमादि चेन्नवलवल्लग्नंतदालग्नभैक्यल्या
ह्नैःसहितंद्विनिघ्नरहिताद्गादितोभास्युक्॥२०॥दायांशेति।अत्रायं

विधिः यस्य ग्रहस्य चक्रपानार्धहानिसंभवोस्ति तस्य तस्य हानिसंस्कृताः आयुः कलाग्राह्याः। ताआयुःकलाः येस्य हानिसंभवो नास्ति तस्य यथास्थिता आयुः कलाग्राह्याः। यस्य हानिसंभवोऽस्ति ताआयुःकलातदधोविकलाश्च स्वयोग्यगुणकेन घ्नः स्वीयेनपूर्वसाधितकर्मणो ग्यगुणकेनगुणनीयाः। खाभ्रनेत्रो २०० धृताः शतद्वयभक्ताः लब्धंकृसदंग्रहाणांसमादिवर्षादिअंशायुर्भवति अत्रायंभजनविधिः। आयुरंशोत्थकलाः स्वयोग्यगुणकेनगुण्याः। आयुरंशोत्थकलाः शतद्वयभक्ताः पूर्णवर्षाणि शेषंकलाविकलाश्च द्वादशभिर्गु

दोयांशोत्थकलाः						
ह	व	म	बु	गु	शु	श
२०६०१२५	७४५	२०११	१७१५	३१३	५८५
५८	३२	४६	४२	९	५४	२५

४७

णयेत्। विकलाः षष्ट्या विभाज्य लब्धंकलासुयोजयेत्। पुनः शतद्वयेन भाज्यंयल्लब्धंतेमासाः। ततस्त्रिंशतासंगुण्य षष्ट्यालब्धंकलासुसंयोज्य। शतद्वयेनभाज्यं यल्लब्धंदिवसाः। पुनः शेषं षष्ट्यासंगुण्य विकलाभिःसंयोज्यः। शतद्वयेनभाज्यंलब्धंघटिकाः। पुनः शेषंषष्ट्यासंगुण्यशतद्वयेनभाज्यलब्धंपलानि। एवंसमादिस्यात्। अथलग्नायुःसाधनं। तनोतिता नोदीयांशकास्याहताःत्रिगुणाः। दिग्भक्ताः दशभक्ताः समाद्यंलग्नायुः। स्यात्। अत्रापिवर्षमासाद्यानयनं प्राग्वदेव। अथचेल्लग्नंबलवत्षड्रूपेभ्योधिकबलंतदालग्नभेस्फुट्यादेः उग्रशान्तितुल्यैर्वर्षैःपूर्वानीतलग्नायुषियोज्यं ततोद्विनिघ्नशरहृत्भागादितोमासयुक्कार्यं। लग्नस्यभागादित्रयमंद्विनिघ्नंपंचभक्तं लब्धंमासाः। शेषंत्रिंशद्गुणंशरभक्तंलब्धंदिवसाः

शेषंषष्टिगुणंशरभक्तंलब्धंघटिकाः। शेषंषष्टिगुणंशरभक्तंलब्धंपलानि। अने
नमासादिनालग्नायुः संयोज्यं। अस्योदाहरणं। रवेर्वार्यांशोत्थकलाः २०।६०
५८। कर्मयोग्यगुणकेन १।१४।९। गुणिताः २५।४७।०। एवंचंद्रादीनामपि।
रवेः कर्मयोग्यगुणकेनगुणितआयुः
कलाः २५।४७। खाभ्रहृताः लब्धंवर्षा
णि १२। शेषंद्वादश १४७।०। द्विशत्य
भक्तंलब्धंमासाः ८। शेषं १६४।०। त्रिं

स्वांशोच्छ्रकाः कर्मयोगगुणघ्नाः भोग्यरवेःकलाः

र	च	म	बु	गु	शु	श
२५।७	२१३	९६३	८६४	२३५	५३६	५१८
०	५१	५७	५७	५७	१८	५५

शद्गुणं ४९२।०। द्विशत्याभक्तंलब्धंदिवसाः २५। शेषं १२०।०। षष्ठिगु
णितं ७२००। द्विशत्याभक्तंलब्धंघटिकाः २६। शेषंषष्ठिगुणितंद्विशत्या ४८
भक्तंलब्धंपलानि०। एवंवर्षादिकंरवेरायुः ९२।८।२४।२६। एवंचंद्रादीना

मपि। तनोर्दार्यांशकाः २२।१२।४६। त्र्याहताः ६६।३८।१८। दशभक्ताः फलं
वर्षाणि ६। शेषं ६।२८।१८। द्वादशगुणितं ७१।३१।२६। दशलब्धंभ
क्तंमासाः ७। शेषं ९।३१।२६। त्रिंशद्गुणितं २८१।४८।०। दशभक्तंल
ब्धंदिवसाः २८। शेषं ९।४८।०। षष्ठिगुणितं ५८८।०। दशभक्तंलब्धंघ
टिकाः ५८। शेषं ८।०। षष्ठिगुणितं ४८०।०। दशभक्तंफलंपलानि ४८।
एवंजातंवर्षाद्यंलग्नायुः ६।७।२८।५८।४८। लग्नबलं ६।७।१४।२८। षड्भ्यो
धिकमस्ति। अतोलग्नस्यसबलत्वाल्लग्नराशि०तुल्येर्वर्षैर्लग्नायुर्युतं
जातं ६।७।२८।५८।४८। लग्नस्यभागादि २२।१२।४६। द्विघ्नानि ४४।२५।
२२। पंचहृल्लब्धंमासाः ८। शेषं ४।२५।२२। त्रिंशद्गुणितं १२२।४६।०।
पंचभक्तंलब्धंदिवसाः २६। शेषं २।४६।०। षष्ठिगुणितं १६६।०। पंचभ

कंलब्धंघटिकाः ३२।शेषं १।षष्टिगुणं ६०।शरहृत्लब्धंपलानि १२।एवं
मासादिना ८।२६।३३।१२।ल
ग्नायुयुतिंजातंस्फुटंलग्नायुर्वर्षा
द्यं ७।४।३१।३२।०।एवंसर्वेषा
मंशायुर्वर्षाद्यमेकत्रलिखितं॥
२०।अथपिंडनैसर्गिकजीवरा

कर्मयोग्यगुणकघ्नायुर्जायुरंशकलाः						
र	चं	मं	बु	गु	शु	श
२५६७	२१३	०६२४६१	३५८	५३६	५१८	
७	४०	५१	५७	५०	१८	४५

र्मायुर्दशेषुआयुर्भागात्त्र्यंशार्धहानिर्वाह॥स्वोच्चोनोद्यत्करोंगभास्सम
धिकोग्राह्योल्पकोनार्कभंतद्भागाद्यत्करोऽभेयदिगुणांशोनांविनावक्रंगं॥ ४९
ह्यान्यअस्तमितेविनाशनिसितौहानिर्द्वयेत्राधिकेकार्धोपिंडनिसर्गजी

वगदितेचक्रार्धहानिर्भवेत्॥२१॥स्वोच्चेनइति।यत्करोग्रहःस्वोच्चोनःका
र्यः।सनुअंगभात्समाधिकोराशिषट्कोधिकोग्राह्यः।अल्पश्चेत्तदातेनाल्पेन
नअर्कभं १२। ऊनंविधेयं।तद्भागाःशेषस्यभागाःकार्याः।यदियत्करोऽरि
भेशत्रुगृहेस्थितदातस्यग्रहस्यभागाःगुणांशोनाःतृतीयांशोनऊनाःका
र्याः।वक्रंविनावक्रग्रहंविना।वक्रोभौमः।अन्येवक्रग्रहगतिग्रहमिच्छंति
तद्बहुभिरपेक्षितत्वान्नादरणीयं।शत्रुभेभौमश्चेत्तदातस्यांशकादिकस्य
त्र्यंशोनग्राह्यः।अस्तंगतोग्रहश्चेत्तस्यभागाद्ध्यान्नाद्विहृताःकार्याः।शनि
सिताभ्यांविनाशनिसिताअस्तंगतावपिअर्धंनहरतः।यतःशनिसितौ
सूर्यवैरिणौततस्तौसूर्यसन्निधानेअस्तंगतावपिस्वायुषोर्धंनहरतः।तथा
चबादरायणः।अस्तंयाताःसर्वएवार्धहानिंकुर्युर्हित्वादित्यपुत्रार्कपुत्रा

विति।एवंतुहानिद्वयेयुगपत्प्राप्तेएकैवअर्धाहानिः कार्या।एतदुक्तंभवति
वैरिगृहेऽर्धांशोहानिः।तस्मिन्नस्तंगतेअर्धहानिः।एवंहानिद्वयेप्राप्तेअधि
कैकैवहानिरिति।अर्धहानिरेवकार्येत्यर्थः।रानिसितक्षयोर्हानिद्वयेऽर्धां
हानिरेव।यतस्तयोरस्तहानिर्नास्त्येव।यथाह यवनः।खेचरेजायतेयोर्ध्वां
शयोरपहारकृः।आयुषःसहरेरर्धंऽर्धांशुक्रशनेश्चरावितिं।अथपैंड
नेसर्गजीवेपिआयुर्द्वयेप्राग्दिताच्चार्धहानिर्भवेत्।षड्राश्येइत्यनी
तगुणकेननेभागागुणनीयाइत्यर्थः।अत्रायंविशेषः।शत्रुभेग्रहेत्यत्र
स्वाभाविकशत्रुर्ज्ञेयोनतुतात्कालिकशत्रुः।नन्वेवंचेत्।चंद्रस्यशत्रोरभा
वात्।ऽर्धांशहानिः कुत्रापिनस्यादितिचेत्सत्यं।नह्ययंनियमोस्ति।यतः
ऽर्धांशहानिःसर्वेषांसंभवतीति।किंतु।यथारवेरर्धहानिर्नसंभवतितथा

चंद्रस्यऽर्धांशहानिरपीति।किंच।सप्तवर्गजबलेअधिशत्रुभेदंतांशकर
तिचंद्रस्यासंभवेपियथान्यग्रहबलाद्यर्थमुक्तं।तद्वत्ग्रहतेप्यस्तु।तात्का
लिकमैत्रीहितत्रैवप्रवर्त्ततेः।यत्राधिमित्राधिशत्रुविचारोस्तिनतुकेवलशत्रु
मित्रविचारे।ग्रहतेतुतात्कालिकमैत्रीविचारेशत्रुभेअधिशत्रुभेचहा
निर्विशेषेणभाव्यंनतुउभयत्रऽर्धांशएवहानिः संभवतीति।अस्योदाहरणं।
रविः २।१४।२०।५८।स्वोच्चेन०।१०।०।ऊनः २।५।२०।५८।अयंराशि
षट्काद्ऊनोस्तिअतोभगणाच्युतः ९।२५।३९।२।अस्यभागाः।२९५।
३९।२।एवंचंद्रादीनां।शत्रुगृहेअस्तंगतेसत्युदाहरणं।अत्रबुधःअस्त
गतोस्ति।एतेबुधस्यायुरंशाः २६८।३१।४२।द्विभक्ताजाताबुधस्या
युरंशाः १३४।१५।५१।अत्रगुरुः शत्रुगृहेस्तिअस्तंगतोस्ति।अत्रहा

निद्वयेप्राप्तेअर्धक्रमाद्धानिः कार्याइत्यत्रमतेगुरोरायुरंशाद्विभक्ताजातागुरोरं
शाः १६।६।१७।३६। अत्रशनिःशत्रुगृहेस्थितेशनेरंशाः १८।६।२१।८। गुणा
शोना ६२।७।२। जाताःशनेरायुरंशाः १२६।१५।६। शनेश्चक्रपातार्धहानि
गुणकेन ०।१२।५३। स्वकीयाआयुरंशाः
१२६।१५।६। गुणिताजाताः ८८।१७।३६।
एवंबुधगुरुशनीनांजाताआयुरंशाः। अ
न्येषांतु यथास्थिताएव। इतिशत्रुक्षेत्रगतं
गतचक्रपातार्धहानिसंस्कृताआयुर्भागा

र्व्यादीनामंशायुर्वर्णद्यं								
र	च	मं	बु	गु	शु	श	उच्च	योग
१२	०	४	२४	२१	३	३	७	६
८	०	९	३	२१	३	७	२	६२
२४	२४	२३	२६	४	५	३	२५	२८
३६	३६	०	५४	४३	१३	५४	३३	२९
०	८८	३६	३६	३६	१२	०	०	८८

लिख्यंते॥२१॥अथपापग्रहेलग्नेसतितेषांभागानांहानिविशेषमाह॥दा
यांशाश्चस्वदापृथक्कृतनुलवादिघ्नाःस्वषट्त्र्युद्धृताआप्तोनास्तनुगेखलेचेद्यदि

सदृष्टेर्ध्यायाथापरे॥निघ्नोग्रोदयभावजेनतनुगेग्रोचेद्बलिष्टस्यर्तत्साम्येपुष्ट्य
लेननेतितनुपोक्तमेन्नाशजेसोक्तिया॥२२॥दायांशाइति। तनुगेलग्नगेखले
पापग्रहेसतिस्वस्वदाग्रहाणांदायांशाःपृथक्कृतनुलवादिघ्नाः। लग्नस्यराशिवि
हायलग्नस्यअंशादिनागुणनीयाः। स्वषट्त्र्युद्धृताः ३६०आप्तोनाःआप्ता
लब्ध्यालवादिक्यापृथक्कृस्वऊनाः कार्याः। यदिचयस्मिन्तनुगेखलेसदृष्टे
शुभग्रहदृष्टेसतिअर्धयालब्ध्याऊनाः कार्या। अथापरेआचार्यावदंति। तथाआ
प्तोदयभावजेनलग्नगतस्यपापग्रहस्यभावफलेनआरोहावरोहफलेन
निघ्नाऊनाःकार्याः। सौम्यदृष्टेशुभग्रहदृष्टेअर्धयाआप्तोनाः कार्याःअत्र
क्रूरशब्देनक्षीणेंदुर्लग्नेसतिइयंहानिर्नग्राह्या। चंद्रस्तुसर्वदाशुभएव॥अतए
वक्रूरविलग्नेसहितेत्यादिबृहज्जातकश्लोकव्याख्यानेभट्टोत्पलेनक्रूरशब्देन

क्षीणचंद्रमनयाह्यइत्युक्तं। तनुगोग्नेलग्नगोयोद्वोपापग्रहोचेत्तर्हितयोर्मध्येबलाधिक्यस्यषड्बलाधिक्यभावफलेननिघ्याघ्न्योनाः कार्याः।तत्साम्येतयोर्ग्रहयोःषड्बलयोःसाम्येसतिफलेनेति॥यत्पुनर्बलाधिक्यंभावबलंतेनैवनिघ्याघ्न्योनाः कार्याः।उग्रोदयभावजेनबलेननिघ्याघ्न्याऊनाइत्युक्तं एतद्युक्तिसहंदृश्यते।कथंपूर्णलग्नभावफलंतर्हिउक्तासंपूर्णहानिः।यथायथाभावफलंन्यूनंभवतितथातथाहानिरपिन्यूनाभवति।भावफलाभावेहानेरभावइतिसद्युक्तिः।इतितनुपेनासौक्रियाअंशजेअंशायुर्दायेनानास्त्येव।एतदुक्तंभवति।लग्नगःपापोयदिलग्नेशोभवतितदादायंहानिर्नकार्यायोयोभावःस्वामिदृष्टयुतोवत्यादिनास्वामियोगःशुभःस्यात्।सेहानिकरोतिनुभवतीतिसद्युक्तं।लग्नेखलेसतिहानिक्रियासाअंशजेअंशायुर्दायुर्दो ५२

येनास्त्येव।शत्रुक्षेत्रेहानिः१अरुंगतहानिः२पापलग्नेचहानिः३एतत्त्रिषुपिंडादिषुत्रिषुउक्तंकथितं।एतत्सर्वंलाकुगिपद्धतौ।लग्नेचेदशुभस्यदोदयग्रहान्हित्वांशनिघ्नंफलंफलंक्रूरस्योदयभावजंयदितनौद्वौचेद्बलिदृस्यस्व॥चेत्साम्येधिकभावजेनबलयोस्तेनयह्यायुःकलानिघ्नाःस्वाभ्रसेंदुदस्रविहृताल्ब्धंत्यजेत्स्वायुषः॥१॥क्रूरःसौम्यशुभेक्षितोयदितदातल्लब्धखंडंत्यजेन्नेतत्कर्मकिलग्नपेतनुगतेक्रूरेपिचांशायुषि॥२॥रामहतेक्षुपद्धतावपि॥क्रूरेलग्नोत्थंफलंभावजंयत्संपूर्णजेत्युक्तमध्येनुपातात्॥एवंलब्धेनोनिताश्चायुरंशाःखेटानांतद्युक्तियुक्तंयदिस्यात्॥१॥अस्मिन्नुदाहरयोशनिर्लग्नेस्तिशुभेनचंद्रेणदृष्टेस्ति॥अस्योदाहरणं॥रवेर्दायांशाः २९।२९।२। पृथक्स्थाः २४।५। २९। २। त०।१२।१२।४धार्तु

नुलवादिना २२।१२।४६।गुणिताः ६५।६७।१३।१२।खषट्युधृताः ३६०
आश्लिर्लवाद्या १८।१४।३२।शुभदृष्ट्वादर्धिता ९।७।१६।अनयापृथक्कृता
दृयांशा १९५।३९।२।हीनाः २९६।३१।४६।जातारवेरायुरंशाः।एवंचंद्रा
दीनामपि।अथापरमतोदाहरणं।खषट्आश्लिः १८।१४।३२।लग्नस्थशनि
भावफलेन ७२९।२।निघ्नाजाता ८।४९।२७।शुभदृष्ट्वादर्धिताजाता
४।२४।४८।अनयापृथक्कृतादायांशाः २९५।३९।२।हीनाजातारवेरायुरं
शाः २९१।१५।१४।एवंचंद्रादीना
मपिसाध्या॥२२॥अथपिंडनैसर्ग

स्पष्टायुर्भग्निःलग्नेखले						
सू	चं	मं	बु	गु	शु	श०
२८६	२३३	२३८	२३०	२६१	२६३	८६
३१	२५	३८	५	३८	२३	३
५६	५०	२६	२०	५०	३	१५

जीवशर्मोक्तानांत्रयाणामायुर्दाया
नांवर्षाद्यानयनमाह॥गोब्धास्त

त्वधृतिप्रभाकृतिथिस्वर्गानखाःपिंडजेनैसर्गेनखभूद्विगोधृतिनखाः पंचा
शदर्कजुषणाः।दायांशाःस्वगुणैर्हताहिभगणांशाप्ताःसमाद्यायुषीस्वर्गा
प्ताभ्रसमादिजैवमिहत्वांशैर्घटीष्यन्वितं॥२३॥गोब्धाइति।पिंडजेपिंडा
युर्दायेअर्कादीनांगोब्धाइत्यादयःसप्तक्रमेणगुणकाःस्युः।तत्रार्कस्यगुणोगो
ब्धाः गावश्चअब्धश्चगोब्धाः। गावोनवअब्धश्चेंद्रः एकः एवमेकोनविंशति
१९।रित्यर्थः।चंद्रस्यतत्वानिपंचविंशतिः२५।भौमस्यतिथयः पंचदश १५।
बुधस्यप्रभाकृतिः द्वादश १२।गुरोस्तिथयः १५।शुक्रस्यस्वर्गाः २१।शनेर्नखाः
विंशतिः २०।गुणैः स्यात्।अथनैसर्गेनिसर्गायुर्दायेअर्कादीनांनखाद्यःक्रमे
णगुणकाःस्युः। तत्रार्कस्यनखाः २० चंद्रस्यभूरेकः १। भौमस्यद्वौ २।बुधस्य
गावोनव ९।गुरोर्धृतिरष्टादश १८। शुक्रस्यनखाः विंशतिः २०। शनेः पंचाश

५३

त्५०।गुणःस्यात्।अथग्रहाणांपूर्वोक्तायुर्दायांशाः।स्वगुणैःपैंडेपिंडोक्तैर्गु
णैः।नैसर्गेनिसर्गोक्तैर्गुणैर्हताःकार्याः ततोभगणांशैःषड्भ्यधिकात्रिंशतैः

पिंडायुर्द्विगुणाः							निसर्गायुर्दायेगुणकाः						
र	च	म	बु	गु	शु	श	र	च	म	बु	गु	शु	श
१९	२५	२५	१२	१५	२१	२०	२०	१	२	९	१८	२०	५०

३६०।भज्याः।एवंसमाद्येवर्षाद्येचायुषीपिंडनिसर्गजेभवतः।भजनप्रकारस्तु
पूर्वोक्तएव।अथजीवशर्मोक्तायुर्दायानयनमाह।।स्वर्गप्ताइति।चकारात्पूर्वोक्त
ग्रहाणामायुर्दायांशाःस्वोच्चोनइत्यादिनाहृतास्तेस्वर्गप्ताः।एकविंशतिहताः ५९
समादिवर्षाद्यंजेवंजीवशर्मोक्तमायुःस्यात्।किंलक्षणं।इभहृच्छांशैर्घटीघ्नदि

तं।इभैरष्टभिः हीयंतइतिइभहृतःइभहृतश्चतेछांशाश्चइभहृच्छांशास्तैः।एत
दुक्तंभवतियस्यग्रहस्यपूर्वंआयुःसाधितंतस्यायुर्भागाःअष्टभिर्भज्याःलब्धंघटी
ध्नेअन्वितंकार्यं।अस्योदाहरणं।रवेर्दायांशाः २८।२१।४८।रवेःपैंडगुणकै
र्गुणिताः ५४४४।३।२४।भगणांशैः ३६०।भक्तालब्धंवर्षाणि १५।शेषं
५४।३।२४। द्वादशगुणं ५२८।४२। ४८।भगणांशैः ३६०।भक्तंलब्धंमासाः
१।शेषं १६८।४२।४८।त्रिंशद्गुणं ५०६१।२४।०।भगणांशैर्भक्तं ३६० लब्धं
दिवसाः १४।शेषं २१।२४।०।षष्टिगुणंअधस्तेनयुतं १२८४।०।भगणांशैर्भक्तं
लब्धंघटिकाः ३।शेषं २०४।०।षष्टिगुणं १२२४।०।भगणांशैर्भक्तंलब्धंपलानि
३४। एवंजातंरवेःपिंडायुर्वर्षाद्यं १५।१।१४।३।२४। एवंचंद्रादीनामपि।अथनैस
र्गिकोदाहरणं।रवेर्दायांशाः २८।२१।४८।रवेर्निसर्गगुणकोननि २०घ्नाः १(

पिंडायुर्वर्षाद्यं

र	चं	मं	बु	गु	शु	श	ल
२५	२५	९	३	६	२५	४	६
३	६	३	३	३	६	११	७
३५	३०	३०	०	३०	३०	०	२८

५७३०।३५।२०। भगणांशैर्भक्तालब्धं वर्षाणि १५। शेषं ३३०।३५।२०। द्वादशगुणितं ३९६७।४।०। भगणांशैर्भक्तंलब्धंमासाः ११। शेषं ७।४।०। त्रिंशद्गुणं २२०।०।०। भगणांशैर्भक्तं लब्धंदिवसाः ७। शेषं २१२।०। षष्टिगुणं १२७२१।०। भगणांशैर्भक्तंलब्धंघटिकाः २५। शेषं १२०। षष्टिगुणितं ७२०० भगणांशैर्भक्तंलब्धंपलानि २०। एवंजातंरवेर्निसर्गायुर्वर्षाद्यं १५।११।०।२५।२०। एवंचंद्रादीनामपिज्ञेयं। अथ जैवोदाहरणं। रवेर्दशाः २८६।३१।४६।२१। स्वर्गभक्तालब्धंवर्षाणि ३ शेषं १३।३१।४६। द्वादशगुणितं १६२।२१।१२। स्वर्ग ३१ भक्तंलब्धंमासाः ७। ५५

निसर्गायुर्वर्षाद्यं

र	चं	मं	बु	गु	शु	श	ल
२५	०	९	३	८	१४	११	६
०	१३	२७	३	०	६	११	७
३५	३०	२६	१	२९	१७	२२	२८
३०	३०	५२	६	३९	३४	४२	५८
			०	०	०	३०	३८

शेषं १५।२१।१२। त्रिंशद्गुणं ४६०। ३६।०। स्वर्गभक्तंलब्धंदिवसाः २१। शेषं १९।३६।०। षष्टिगुणितं ११७६। ०। स्वर्गभक्तंलब्धं घटिकाः ५६। पलानि ०। एवंरवेर्जैवायुः १३।७। २१।५६।०। रवेर्दशाः २८६।३१।४६। इभहृल्लब्धंघटिकाः २५।४८। दि॥ घटिकादिषु ५६।०। अन्वितं २१।४८। एवंजातंरवेर्जैवायुर्वर्षाद्यं १३।७।२१।२१।४८। एवंचंद्रादीनामपिज्ञेयं॥ ॥२३॥ अथपैंडादिषुत्रिषुआयुर्दायेषु लग्नायुर्दायानयनमाह॥ स्यात्स्विसा रवनरवोधृता विभतनोर्वर्षादिपैंडात्रिके लग्नायुर्निखिलैस्तदंशकसमंवेष्टि

श्चिद्भतुल्यं स्मृतं॥ यस्येशोधिबलस्तदेवहिपरैस्तेनाथ द्यमन्यैर्यदंशायुर्बलथवा
शातुल्यमखिलोक्तंग्राह्यमेवारिभं॥२४॥स्यादिति॥विभतनोः विगतानिभानिरा
शायोयस्मात्तद्विभं। विभंचततनुश्च विभतनुः। तस्यविभतनोः। लिप्ताः राशिर
हितस्यभोगादिकस्यलिप्ताः। खनखोधृताइति। रातद्वयहृताः। वर्षादिलग्ना
युः पिंडादित्रिकोपिंडनिसर्गजीवायुर्दयेषुज्ञेयं। तल्लग्नायुःअंशक्रसमं। लग्नेभ
नूनवांशसमंनिखिलैराचार्यैः स्मृतं॥ कैश्चि

जीवायुर्वर्षाद्यं							
र	च	म	बु	ज	शु	श	ल
७	२०	२१	६	८	२२	२	६
२२	७	२	२१	६	६	२१	७
२१	२३	२१	२	२१	२५	२३	२८
२१	२३	२८	२६	२५	२३	३६	२८

द्भतुल्यंलग्नराशितुल्यंस्मृतं। यस्येशोति। रा
शिनवांशयोर्मध्येयस्य स्वामीअधिकबलः
तदेवकार्यमित्यपरैः स्मृतं। द्वयोर्मध्येअंश
कनाथेधिकबलेअंशतुल्यग्राह्यं। राशिना

थेधिकबलेराशितुल्यंग्राह्यमित्यर्थः॥अन्यैरेवमुक्तं।अंशायुर्वलग्नायुः स्यात्।
तेनाद्यमिति।तेनअंशसमेनराशितुल्येनवाऽऽद्यंकार्यं।तद्यथाअंशानाथेबला
धिकेअंशतुल्यायुषाऽऽद्यं। राशिनाथेबलाधिकेराशितुल्यायुषाऽऽद्यंकार्यं।
एवमेतेषुकेषांचिन्मतेषुसत्स्वपिआदिमंप्रथमानीतंअंशसममेवबहुसंमतंग्रा
ह्यमित्यर्थः।अस्योदाहरणं।विभतनोः लि२५।१२।४६। प्ताः१३३२। ४६। खन
खो २००। धृताः ७८ लग्नायुर्वर्षाद्यं ६७। २८५८। ४८। एवंत्रिषुआयुर्दायेषु
ज्ञेयं॥२४॥एतेषुचतुर्षायुर्दायेषुसत्सुकस्यप्रामाण्यमित्यतआह॥अं
शायुश्चेन्नाविनेधिकबलेपिंडंनिसर्गविधोस्याच्चेत्तुल्यबलेद्वयोर्युतिदलं तु
ज्जायुषोश्चेक्षयः॥त्र्यंशेत्रिबलेविहत्यचयुतिंवीर्येकहृद्वात्रिजायुर्युत्यात्रिलवो
थऽऽवमुदितंचेद्दीनवीर्यस्त्रियः॥२५॥अंशायुश्चेति।लग्नार्कचंद्राणांमध्येननो

लग्नेअधिकबलेसतिषड्रूपाधिकेषड्बलैकोनतिसतिअंशायुःसाध्यं। इनेसूर्येषड्
रूपाधिकेषड्बलेसतिपिंडायुःसाध्यं। विधौचंद्रेषड्रूपाधिकेषड्बलैसतिनिस
र्गायुःसाध्यं। चेद्द्वयोस्तुल्यबलंतयोर्युतिर्दलंआयुरिति। अयमर्थः। एषामेक
स्यन्यूनबलंषड्रूपाद्यत्यबलं। ततः द्वयोस्तुल्यबलंषड्रूपाधिकं द्वयोर्बलं
तदातज्जायुषोः षड्रूपाधिकबलयोः योगार्धमायुःस्यात्। तद्यथा। लग्नार्क
योःसमबलयोःषड्रूपाधिकबलयोःअंशायुःपिंडायुषोर्योगार्धमायुःस्या
त्। लग्नेंद्वोःसमबलयोःषड्रूपाधिकबलयोःपिंडनैसर्गिकयोर्योगार्धमायुः
स्यात्। चेत्त्रयःलग्नसूर्यराशिनःसमबलाः तदात्र्यायूंषित्रयाणामायूंषित्रयाणां
त्रिबलैर्निहत्य। लग्नषड्बलेनअंशायुर्दायोगुणनीयः। अत्रगुणनप्रकारः।
वर्षाणिद्वादशगुण्यानिअधस्तनमासयुक्तानिमासाःभवंति। मासश्चत्रिंशद्गु



ण्याःअधस्तनदिनसंयुक्ताः दिनानिभवंति। इदंदिनघटिकात्मकमायुर्लग्न
बलेनगुण्यं। एवंसर्वग्रहाणां। तथैवसूर्यबलेनपिंडायुर्दायोगुणनीयः। तथै
वचंद्रबलेननिसर्गायुर्दायोगुणनीयः। गुणितानांत्रयाणांयोगःकार्यः। त्रया
णांबलैक्येनभाज्यः तद्दिनात्मकंमिश्रायुर्भवति। अत्रदिनानित्रिंशद्गुणानि ल
ब्धंमासाः। मासाः द्वादशभक्ताः फलंवर्षाणि। एवंवर्षादिर्मिश्रायुर्दायोभवति।
अथवापक्षात्मकमायुःकार्यं। स्वस्वबलेनगुण्यंफलात्मकंऊर्ध्वंकृएवभाज्यः।
अधस्तनंकोनग्राह्यः। बलयोगोभाजकः। यल्लब्धंतत्पक्षात्मकमायुः। इदंपक्षा
भक्तंघटिकात्मकं। तदपिषष्ट्याभक्तंदिनात्मकं। तत्त्रिंशद्भक्तंमासात्मकं। त द्
वाभक्तंवर्षात्मकं। इदंपूर्वोयुर्दायसमं। यद्वात्रिजायुषांयुत्यास्तृतीयांशःस
मादिःस्यात्। यदालग्नसूर्यराशिनःमध्यमबलाःषड्रूपाद्यत्यबलाःरूपत्रे

यादधिकबलाः। तदाऽऽयूंषि त्रिबलैर्निहत्य इत्यादिनाऽऽयुः साध्यं। त्रयाणां मध्येएकोहीनबलः रूपत्रयादल्पकः। द्वौमध्यबलौतदाद्वयोर्युतिदलमित्यादिनाऽऽयुः साध्यं। त्रयाणांमध्ये द्वौहीनबलौएकोमध्यमबलः तदाऽनूप्रकारेणतस्यैवऽऽयुः साध्यं। लग्नेमध्यमबलेऽंशायुः। सूर्येमध्यमबलेपिंडायुः साध्यं। चंद्रेमध्यमबलेनिसर्गायुः साध्यं। अत्रत्रयाणांबलसाम्येत्र्यायूंषित्रिबलैर्निहत्यइत्यादिनाऽऽयुः साध्यं। तथैवद्वयोः समबलेद्वयोरायुरानीयद्वयोः षड्बलैर्निहत्यएकीहृत्यद्वयोः षड्बलैक्येनभजेत्तदातत्पायुर्ज्ञेयं। इदमुख्यायुर्निसिद्धंभवति। त्रिजायुर्युत्यात्रिबलैत्यादिनाप्रकारांतरेणऽऽयुः साध्यं। तथैवद्वयोर्युतिदलमित्यादिनाऽऽयुः साध्यं। तदुक्तंह्यालुगिपद्धतौ। यदात्रयाणामपिवीर्यसाम्यमेषांद्वयोः स्याद्यदिवीर्यसाम्ये। त

५८

दातदायुःस्वबलेननिघ्नमेकीकृतंतद्बलयोगभक्तं॥१॥पृथक्पृथक्साम सदांतदायुः श्रीनीलकंठादयआहुरेवंयद्यायुरेकंग्रहसंख्यायासंतच्छीधराचार्यमतंनिरस्तं। दामोदरपद्धतावपि॥लग्नार्कचंद्रायदिवीर्ययुक्तास्तदाविलग्नस्यबलेनहन्यात्।अंशायुरर्कस्यबलेनपिंडं।नैसर्गिकंचंद्रमसोबलेन॥१॥सर्वाण्यथैक्यविधायतानिबलैक्यभक्तानिसमादिकंस्यात्।पूर्वंचमिश्रायुरिदंद्वयोर्वाबलैक्यतोवोभयवीर्यसाम्ये॥२॥साध्यंबुधैः स्पष्टमिदंजगादश्रीजीवेशर्मामतिमान्यथैवमिति।अत्रजैवमिति॥चेत्रयोपिहीनवीर्याःहीनबलाःरूपत्रयात्यबलास्तदाजैवंजीवंशर्मोक्तमायुरुदितं।उत्तममध्यमहीनबलानांलक्षणमग्रेवक्ष्यति।अत्रलग्नार्कचंद्राणांषड्रूपाधिकबलत्वान्मिश्रायुःसाध्यते।अस्योदाहरणं। रवेरंशायुः १२।८।२४।३६।०। वर्षाणिद्वादशगुणि

तानि१५९।अधस्थमास८युक्तानि१५२इदंत्रिंशद्गुणितं४५६०।अधस्थदिन
२९युतंजातंदिनादिकं४५८९।३६।०।इदंदिनघटीपलात्मकंलग्नबलेन ध्।
७०।१५गुणितं३१११७।५८।२१।एवंचंद्रादीनां।तथैवदिनीकृतपिंडायुर्दा
यःसूर्यषड्बलैक्येन ध्।३७।४९।गुणयेत्।तथैवचंद्रषड्बलैक्येन ध्।४१।४३
दिनीकृतनिसर्गायुर्दायोगुणनीयः।गुणितानांत्रयाणामायुर्दायानांयोगोभाज्यः
१०५५७३।५५।१८।लग्नार्कचंद्राणांषड्बलयोगोभाजकः२७६।४२।सव
र्णिताभाज्यभाजकौभाज्यः३८००६६११८।भाजकः७३४०२।भाजकेनह
तेनभाज्येलब्धंदिनानि५२४९।शेषं२८०२०षष्टिगुणितं१६८१२००भाज
केनभक्तेलब्धंघटिकाः२३।शेषं१५९५९।षष्टिगुणितं९५७२४०भाजकेन ५९
भक्तेलब्धेपलानि१२दिनस्थानेत्रिंशद्भक्तंशेषंदिनानि२९।लब्धंमासाः१७४

मासाद्वादशभक्ताशेषंमासाः६।लब्धंवर्षाणि१४।एवंजातंरवेर्वर्षादिमिश्रायुः
१४।६।२९।२३।१३।एवंचंद्रादीनांएवंजाताआयुर्दायाः।सर्वेआयुर्दायाअग्रि
मपत्रेलिख्यंते।७८।अथप्रकारांतरं।अत्रलग्नार्कचंद्राणांबलसाम्यात्षड्रू
पाधिकबलत्वात्मिश्रायुःप्रमाणं।रवेरंशायुः।१२।८।२४।३६।०।पिंडायुः
१५।१।१४।३।२४।निसर्गायुः१५।११।०।३२।२०।त्रयाणांयोगः४३।९।९।
१४।५४।अस्यतृतीयांशः१४।७।३।४।५८।वर्षादिरवेर्मिश्रायुः।एवंचंद्रा
दीनामपिसाध्यं॥२५।अथाधिकन्यूनबलज्ञानमाह।त्र्यत्येहीनबलोबली
षड्धिकेवीर्यग्रहस्योदयोभिन्नंस्वलग्नहेस्मृतायुरितियत्प्राङ्नैर्व्यवस्थापितं॥
अंशायुर्बलसंमतंभवतितत्सत्यंचसत्यादितंस्याद्धर्मिष्ठसुशीलपथ्यसु
भुजानस्यादिदंपापिनां॥२६॥त्र्यत्येति।त्र्यत्येवीर्यरूपत्रयात्येषड्

सर्वेषामायुर्दायादिरुच्यते

	लग्नाधिकबले अंशायुः दिनीकृतंलग्नलक्ष्मितं		रविबलक्षं ६ पिंडायुः ३० दिनीकृतं ४६		चंद्रबलक्षं ६ निसर्गायुः ४२ दिनीकृतं		त्रिकेसमबले त्रयाणांआयुर्दायानांयोगः
र	३१११७।५८।२१	र	३६०८८।३५४	र	३८६५।५३	र	१०५५७।५५।१८
चं	२६१०।६०।३५	चं	३७०३।२८।१८	च	१४८६।३८।४६	व	८७१३९।१६।५५
मं	१२७६२।४८।१९	मं	२३७२८।४९।३३	म	३१९५।३१।४६	म	३८६८७।९।३८
बु	५९४३७।३१।२६	बु	१०३५०।४७।२०	बु	७८४०।५०।२३	बु	७७६२।९।१४
ग	३५५०।२०।५५	ग	१६०७३।७।१९	ग	१९४०।५४।५३	ग	६४७०४।२३।७
शु	६५५१।२५।५०	शु	३६६६४।४९।५४	शु	३५२६८।३६।११	शु	७८८४।५१।५५
श	६३३७।४९।४२	श	११४०८।५२।१२	श	२८८७।४९।३८	श	४६५५४।३१।३२
ल	१८०९२।१८।२७	ल	१५९०२।३४।१८	ल	१६०६१।५१।१४	ल	५००५६।४२।५९

६१

मिश्रायुर्दायाः

र	व	म	बु	ग	शु	श	ल	योगः	
१४	५	५	१०	८	१०	६	६	६९	वर्ष
६	८	४	८	११	१०	५	१०	५	मासाः
२९	५	३	१६	७	२	४	२८	२१	दिन
२३	३२	३	[illegible]	३०	२८	५६	५४		घटि
१३	३५	४	२३	२२	१६	७	२१	२१	पलानि

बलैक्येसतियहोलग्नंवाहीनबलं स्यात्।षडधिकेषड्रूपाधिकेषड्बलैक्येसतियहोलग्नंबलीय स्यात्।भिन्नमिति।स्वस्वमते भिन्नमेवचतुर्विधमायुः स्मृतं उक्तं।नचतुर्णामेकत्रकथनं॥ नचसंगच्छतेअस्मिन्शास्त्रेत चतुर्विधमायुःप्राज्ञैर्व्यवस्थापितं।प्राज्ञैर्बुद्धिमद्भिराचार्यैः नीलकंठश्रीध रादिभिः।अंशोड्डयलग्नबलात्साध्यमित्यादिभिर्व्यवस्थीहृतं।एवंव्य वस्थासमांसत्यामपिअंशायुर्बहुसंमततत्सत्संभवति।यतःसत्योदितं

जातकशास्त्रेअतिप्रवीणेनाचार्येणउदितंकथितं।उक्तंचवराहमिहिरेण।बहु
साम्यंसमुपैतिसत्यवाक्यमिति।तथाधर्मेषुस्वस्वाश्रमधर्मेषुचयतत्पराः
संतिसुशीलवतांस्वकुलस्यशीलयुक्तांलीलांदधतां।पथ्यसुभुजांपथ्यं
हितंयद्भोजनंतत्सेवतांएतादृशानांनराणांगणितागतमायुर्भवति।
एतद्व्यतिरिक्तानांपापिनांनस्यात्।येनराःपापलुब्धाःतेषांगणितागते
आयुषिबहुतरेसत्यपिअकस्मान्मरणंभवति॥२८॥ननुअंशायुर्दाये
ष्वंशहानिःकुतोनोक्तेति।शिष्यभ्रांतिनिरासार्थमाह।हानिर्यास्तमितेरिभे
ष्वनुमितांशोत्थेष्वबुध्यानतद्यस्माच्चेष्टिकुआश्रयेस्तिनिखिलैःपिंडादि ६१
षूक्ततः।आयुःसौरमिदंयतोऽब्दगणनासौरात्ततःसूरिभिःप्रोक्तंसत्य
मसद्यदल्पकथितंनाक्षत्रकंसावनं॥२९॥हानिरिति।अस्तमितेअर्धहानिः

वैरिभेष्वंशहानिः।यापिंडादिषुत्रिषूक्तायुर्दायेषूक्ता।साहानिः।अल्पबुध्या
केनचित्अंशोत्थेअंशायुर्दायेअनुमिताकथिता तदसत्।यस्मादस्तमितहानि
श्चेष्टिकेचेष्टागुणेऽस्ति।यतःअस्तंगतस्यचेष्टागुणेऽर्धमेव।वैरिगृहेष्वं
शहानिरुक्ता।तथाच।ष्वंशोनितंरिपुगृहेइत्याश्रयगुणेऽस्ति।अतएवोक्तं
आयुःसौरमिति।इदमत्रोक्तंवर्षाद्यायुस्तत्सौरमेव।अतोऽब्दगणनासौरमानेने
वकल्पिता।तदुक्तंसिद्धांते।वर्षायनर्तुयुगपूर्वकमत्रसौरमृदितियत्सूरिभिः
प्रोक्तंतत्सत्यंसमाःषष्टिर्द्विघ्नीमनुजकरणामितिपरमायुर्वर्षैःकथितं।तथापिं
डायुर्दायादीनामनुपातोवर्षैरवकृतोऽस्ति।अतोऽब्दगणनायांसौरमेवसूरि
भिःप्रोक्तंतत्सत्यं।अल्पकथितंनाक्षत्रंसावनंतदसत्।अल्पंकैश्चित्ना
क्षत्रंकैश्चित्सावनमितियत्कथितंतदसत्।तत्रदामोदरपद्धतौनाक्षत्रंकथितं

उत्पलेनसावनमितिकथितं। तदसत्। यतःश्रीपतिश्रीधराचार्यैःयुगार्कृच
क्रैर्युगसूर्यसावनइत्यनुपातेनदशाप्रवेशेसौरस्यसावनोद्यपिंडोग्रहसा
वनायद्यतस्तद्ग्रहनामहर्गणतंकिंव्यर्थंस्यात्। सावनमायुश्चेत्तर्हिअय
मनुपातोनलगत्येव।अतोनाक्षत्रसावनमायुर्ग्रहंतद्ग्रहविरोधादयुक्त्वा
च्चासदेव॥२७॥अथान्येषांप्राणिनांपरमायुःपरःसुरमायुर्दायानयनमा
ह॥पंचाहंनखभूसमानृकरिणांव्याघ्राद्यजादेर्नृपागोकात्योर्हिजिनाश्वथोष्ट्र
खरयोस्तत्वानिसूर्याःश्वनः॥अस्वायुःपरमंरदानृवदिहानीयायुरेषांपरेयुर्नि
घ्नंनृपरायुषाचविहृतंतेषांस्फुटायुर्भवेत्॥२८॥पंचेति।पंचदिनाधिकंविं
शत्यधिकंशतं१२०।०।५।समाःअश्वानिनृकरिणांनरगजानांपरमायुः
स्यात्।व्याघ्रादेःअजादीनांनृपाःषोडशाह्याः१६।गोकात्योःगोमहिष्योः

६२

जिनाश्चतुर्विंशति२४वत्सराः।उष्ट्रखरयोःतत्वानिपंचविंशतिः२५श्वनः
कुक्कुरस्यसूर्याःद्वादशवर्षाणि१२।अश्वस्यरदाः३२द्वात्रिंशद्वर्षाणिपर
मितिप्रत्येकमभिसंबध्यते।एषांप्राणिनांनृवत्मनुष्यवत्।आयुरानीयते
षांस्वस्वपरमायुषानिघ्नंगुणनीयं।नृपेरायुषानराणांपरमायुर्दायेन१२०।०।
५।विहृतंभक्तंयेषांप्राणिनांस्फुटायुःस्यात्॥२९॥इतिकेशवीयेआयुर्दाया
दाहरणं।अथग्रहाणांसमस्तशुभाशुभज्ञानार्थंकोदशाध्यायःआरभ्यते।
यस्ययुर्यदसौदशास्यवशुभेक्षेत्रस्वभांशेतथारोहानीचपरिच्युतस्ययदि
लाक्षणिनीवांशभे॥त्यक्तोक्षेत्रवरोहिणीभवतिसामध्योक्षभिन्नस्वभांश
सदृष्टयुतस्फुरत्करबलिष्टाधिक्यात्कुभा॥२९॥युस्येति।यस्यग्रहस्यप
दायुरसौअस्यग्रहस्यदशास्यात्॥इष्टोक्षस्वभांशुभाइष्टश्चउक्षचस्वश्च

एषांभांशंइष्टोच्चस्वभांशं। इंदैक्यवद्भावः। इष्टस्यमित्रस्यभेंशेग्रहेसति स्व
स्यभेंशेवाग्रहेस्वोच्चस्यभेंशेवाग्रहेसतिदशाशुभास्यात्।तथानीचपरिशु
तस्यदशाआरोहाशुभास्यात्।यदिआरिनीचांशभेग्रहेसतिआरोहा कष्टा
ति।अरिश्चनीचंचआरिनीचेतयोरंशेनयांशेभैराशिः तस्मिन्।अरेः भेशेड
